1562 CC-0. In Public Domain. Digitization by eGangotri

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकं पत्रम्)

एकविंशे वर्षे चतुर्थोऽङ्कः

१५ अक्तूबर, १९९९

राष्ट्रे जागृयाम

संस्कृतवर्षम् युगाब्द 5101 (1999-2000)

प्रधानसम्पादकः

डॉ० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६, वाणी—विहारः, नयी दिल्ली—११००५९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अर्वाचीनसंस्कृतम् (२१/४)

१५ अक्टूबर, १९९९ ई०

विषयसूची

विषय	लेखकः	पृष्ठ
१. सम्पादकीयम्	सम्पादकः	१-३
२. शारदा-नुतिः	पं० प्रेमदत्त शास्त्री	४
३. भारतमाता विजयतेतराम्	डॉ० वासुदेव वि० पाठक 'वागर्थः'	४
४. योऽयं कृतः शपथस्त्वया	डॉ० रमाकान्तशुक्लः	५-७
५. भारतीयशासनं विजयताम्	'अभिराज' डा० राजेन्द्र मिश्रः,	८
६. पटेलमञ्जरी : एकं निरीक्षणम्	गिरिशः जानी	९-१५
७, सम्भ्रान्ताः किममी जनाः	प्रभात कुमार शर्मा	१६
८. द्विपदिका	डॉ० रश्मिकांत व्यासः	१६
९. व्योम शेखर की 'अहं राष्ट्री:' शिल्प और संवेदन	श्रीमती शशि चौहान	१७-२६
१०. सुधर्मायाः साहित्यसेवा	डॉ० बा० श्री० रामकृष्णरावः	२७-३०
११. अर्वाचीनसंस्कृते 1999 यावत् प्रकाशिता सामग्री (लेखा, पत्राणि, वार्ता रचनाश्च)	डॉ० चन्द्रमौलिः शुक्लः	३१-७१
१२. देववाणी-परिषद्वार्ता	आनन्दवर्धनः शुक्लः	७२
१३. संस्कृतजगद्वार्ता	अभिनव शुक्लः	७३-७५
१४. गीतम्	रामविनय सिंहः	७५
१५. भवतां पत्रम्	१. 'अभिराज' प्रो०राजेन्द्र मिश्रः, २. श्रीकान्तमिश्रः 'कुशलः' ३. श्री० सुन्दरराजः ४. डॉ० (श्रीमती) सरिता पाण्डेयं ५. प्रो० मूँगाराम त्रिपाठी	७६-८०

अर्वाचीनसंस्कृतम् (पंजी. सं. 34554/79)

१. प्रकाशनस्थानम्-नयी दिल्ली ।

२. प्रकाशनकालावधिः-त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च- डॉ0 रमाकान्तशुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९

४. पत्राधिकारिणां नाम्ना सह सङ्केतः-देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति। १५-१०-१९९९ ई. रमाकान्तशुक्लः (प्रकाशकः, सम्पादकः)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सम्पादकीयम्

अर्वाचीनसंस्कृतस्यायमङ्को वर्षाणामेकविंशतिं पूरयति। अतोऽङ्केऽस्मिन्न द्यावध्यर्वाचीनसंस्कृते प्रकाशितायाः सामग्र्या विस्तरशः संसूचनं ददानो डॉ० चन्द्रमौलिशुक्लस्य 'अर्वाचीनसंस्कृते १९९९यावत्प्रकाशिता सामग्री (लेखाः, पत्राणि, वार्ता रचनाश्च)'इति शीर्षको लेखो दीयते। १९९१तमे १९९३तमे च वर्षेऽपि डॉ० शुक्लेन स्वलेखाभ्यां तदवधि प्रकाशितायाः सामग्र्याः परिचयोऽदीयत। इदानीं तत्र परिवर्धनं कृत्वा अद्यपर्यन्तं प्रकाशितायाः सामग्र्याः परिचयो दीयते। अस्यां सूच्यां अर्वाचीनसंस्कृतस्य सम्पादकीयानामुल्लेखो नास्ति। अनेन सूचनापरकेण लेखेन अर्वाचीनसंस्कृतस्य पाठकाः संशोधकाश्च अवश्यमेव लाभान्विता भविष्यन्तीत्याशास्यते।गतवर्षे(१५.१०.१९९८ तारिकायां) बडोदरानगरे समायोजितेऽखिल-भारतीय-प्राच्यविद्यासम्मेलने 'आधुनिकसंस्कृत-साहित्या'नुभागे ममाध्यक्षतायां पठितेषु षष्टिप्रायेषु लेखेषु श्रीमता गिरिशजानिमहाभागेन प्रस्तुतः 'पटेलमञ्जरी : एकं निरीक्षणम्'इति शीर्षको लेखः किञ्च डॉ०बा०श्री० रामकृष्णरावमहाभागेन प्रस्तुतः 'सुधर्मायाः साहित्यसेवा'इति शीर्षको लेखः अत्र प्रकाश्येते। उभावपि लेखौ अर्वाचीनसंस्कृतरचनायाः संस्कृतदैनिकपत्रस्य च विषये उपयोगिनीः सूचनाः परामर्शांश्च दत्तः। अर्वाचीनसंस्कृतस्य विंशवर्षीये प्रथमेऽङ्के व्योमशेखरस्य (डॉ०विशनगौडमहाभागस्य)'विभाति भारती धरा'-इतीयं रचना प्रकाशिताभूत्। अनेन महानुभावेन दशवर्षाणि पूर्वं 'अहं राष्ट्री'ति संज्ञकस्य गीतिकाव्यस्य रचना कृता यस्य प्रकाशनं 'लोकालोक प्रकाशन, १५६ श्याम पार्क, साहिबाबाद-२०१००५'इत्येतया संस्थया १९९०तमे ख्रैष्टेऽब्दे कृतम्। श्रीमत्याः शशिचौहानमहाभागाया 'व्योमशेखर की 'अहं राष्ट्री' : शिल्प और संवेदन'इत्येतच्छीर्षको हिन्दीभाषानिबद्धो लेख उक्तगीतिकाव्यमवलम्ब्य संक्षेपतः समीक्षां करोति। अर्वाचीनसंस्कृते यदा-कदा हिन्दीमाध्यमेनापि अर्वाचीनसंस्कृतपरका सामग्री प्रकाश्यते-अस्य निदर्शनमयं लेखः।

मया अर्वाचीनसंस्कृतस्य (१५ जुलाई, १९९५ तारिकायां प्रकाशिते १७/३ अङ्के) सम्पादकीये 'राष्ट्रपतिपुरस्कार' विषयीकृत्य किञ्चिदप्रियं पथ्यञ्च तथ्यमुद्गीरितमासीत्। तत्रैव 'अभिराज'राजेन्द्रमिश्रस्य राष्ट्रपतिपुरस्कारार्हता प्रतिपादितासीत्। १५.८.१९९९ तारिकायां प्रातरेव डॉ० रामकरणशर्ममहाभागैरहं दूरभाषेण वर्धापितः 'अभिराज'राजेन्द्रमिश्रस्य राष्ट्रपतिपुरस्कारलाभवार्तया। वस्तुतः आनन्दितोऽभूवमहम्। मया चिन्तितं च-किमु पञ्च वर्षाणि पूर्वमभिराजो राष्ट्रपतिपुरस्कारार्हो नासीत्। अवश्यं तदाऽप्यसौ विद्वान्, गद्यकर्ता, प्रबन्धमुक्तकादिपद्यकर्ता, कथाकर्ता, नाटककर्ता, शोधकर्ता, शोधकारयिता, सम्पादको महाकविश्चासीत्। यदि पुरस्कारोऽस्मै पञ्चवर्षाणि पूर्वमेव दत्तोऽभविष्यत्तदा नूनं पुरस्काराशेः सदुपयोगोऽभविष्यत्। अस्तु विलम्बादपि तरुणविदुषामुपरि चयनकर्तॄणामनुरागदृष्टिर्निपतितेति विज्ञाय हर्षप्रकर्षमनुभवामि, वर्धापनं च चयनकर्तृभ्यो ददामि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'योऽनूचानः स नो महान्'इति नियमत आयुषा कनीयानपि वैदुष्येन ज्यायान् ममादरणीयो भ्राता डॉ० 'अभिराज' राजेन्द्रमिश्रो मयार्वाचीनसंस्कृतपक्षतो देववाणी-परिषत्पक्षतश्च साभिनन्दनं वर्धाप्यते। अस्य महानुभावस्यैकं पत्रं मयाऽलम्भि यत्रास्य हृद्या शैली व्यापकदृष्टिश्च संलक्ष्येते। औपचारिकतानौपचारिकता चास्य पत्रस्य न पृथक्कर्तुं शक्येते। अस्मिन् पत्रेऽभिराजस्य महत्त्वेऽपि विनयशालित्वमवलोकयितुं सुशकम्। पत्रमिदमविकलतयाऽत्राङ्के प्रकाश्यते।

अर्वाचीनसंस्कृतस्य कृतेऽयमपरो हर्षोदन्तो वर्तते-डॉ० शिवदत्तचतुर्वेदमहाभागायाप्यैषमस्तनो राष्ट्रपतिपुरस्कारो दीयत इति। डॉ० चतुर्वेदस्य 'स्फूर्तिसप्तशती'-'राजनीतिशतका'द्या रचना अर्वाचीनसंस्कृते प्रकाशिता जाताः। डॉ० चतुर्वेदमहाभागाय भूरिशो वर्धापनानि।

अर्वाचीनसंस्कृतस्य ३/३ अङ्के (जुलाई १९८१) श्री पी०सी० देवस्य महाभागैः प्रणीतं 'क्रिस्तुभागवत'मवलम्ब्य आचार्य डॉ० श्री रमेशचन्द्रशुक्लमहाभागानां 'क्रिस्तुभागवतसमीक्षे' तिशीर्षको लेख प्रकाशितो जातः। अस्मिन् वर्षे श्री पी०सी० देवस्य-महाभागेभ्योऽपि राष्ट्रपतिपुरस्कारो दीयते-इति कृत्वा अर्वाचीनसंस्कृतपक्षतस्तेभ्योऽपि वर्धापनानि समर्पयामि।

देववाणी-परिषदः स्थापनावर्षे डॉ० सुरेन्द्रनारायणत्रिपाठिमहाभागोऽस्याः परिषद उपाध्यक्षत्वेनास्मभ्यं सुलभ आसीत्। असौ महानुभावोऽप्यैषमस्तनं राष्ट्रपतिपुरस्कारं लभते-इत्यपरो हर्षोदन्तः। सर्वेऽप्येतेऽस्माकं गौरवं वर्धयन्तीति सन्त्यस्माकमभिनन्दनीयाः प्रणम्याश्च।

वैदुष्यं कवित्वञ्चाद्यापि जागर्ति तरुणेषु। तरुणकवीनां पङ्क्तौ डॉ० इच्छाराम द्विवेद 'प्रणव'-डॉ० विन्ध्येश्वरीप्रसादमिश्र 'विनय'-डॉ० जनार्दनप्रसादपाण्डेय 'मणि'- परम्परायामपरमपि नाम संयुक्तं श्रीमतः श्रीकान्तमिश्रस्य 'कुशलो'पनाम्नः। अयं मधुरेण स्वरेण स्वरचनाः पठति। अस्य गद्यच्छविरपि दृष्टिमावर्जयति। अस्य महानुभावस्याप्येकं पत्रं मया प्राप्तं यत्र विविध न्यायानामुपयोगोऽनेनाकारि। वर्धतामस्य कवित्वम्। अस्य पत्रमप्यत्राङ्के प्रकाश्यते।

श्री॰सुन्दरराजमहाभागस्याप्येकं पत्रमंशतः प्रकाश्यते यत्र मुद्रणदोषस्य परिष्कारः कांक्ष्यते। एवमेव यदि सर्वेऽपि लेखकाः कवयश्च स्वलेखमथवा कवितां पठित्वास्मत्सकाशे शुद्धिपत्रं प्रापयेयुस्तदा पत्रमिदं बहूपकृतं भवेत्। धन्यवादा वितीर्यन्ते श्रीमद्भ्यः श्री०सुन्दरराजेभ्यः।

अयमङ्को तदा प्रकाश्यते यदा भारतस्य त्रयोदश्या लोकसभाया गठनं भवति। १३.१०.१९९९ तारिकायां भारतस्य महामहिमराष्ट्रपतिना श्री के० आर० नारायण महाभागेन श्रीअटलविहारी वाजपेयी-महोदयाय तत्सहयोगिभ्यश्च शपथो दापितः। 'शपथ'इति त्र्यक्षरपदस्यास्ति कश्चिद् गभीरोऽर्थः। शपथमधिकृत्यैका रचना मया १३.१०.१९९९ तारिकायां शिमलानगरं प्रति प्रस्थितेन मध्येमार्गं रचिता या सामान्यतः कमपि शपथं विषयीकरोति देशकालादिवैशिष्ट्येन च मन्त्रिभिः गृहीतं शपथमपि स्पृशति। शिमलानगरे 'अभिराज' राजेन्द्रमिश्रस्य गृहमधिवसता मया सोऽपि प्रार्थितः लघ्वीं कवितामेकां प्रणेतुं यत्र शासनात्कविः किमपेक्षते-इति संकेतितं स्यात्। १४.१०.१९९९ तारिकायां सायं सपादसप्तवादनवेलायामहम् अभिराजवासतः दिल्लीं प्रति यदा पतिष्ठे स्म तदा अभिराजेन मम हस्ते रचनैका दत्ता। अस्यां रचनायां प्रजातन्त्रशासनेन साकं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

राष्ट्रस्य सुव्यवस्था, सुरक्षा, समृद्धि, शान्तिः, प्रगतिश्च काम्यते। दिनत्रयपूर्वमस्माकं प्रतिवेशी देशः सैन्यशासनाधीनो जातः। एवमस्माकं भारते तु न सम्भाव्यते। अत्र तु प्रजातन्त्रं वर्तते। किन्तु प्रजातन्त्रेऽपि परिष्कारो दृढता च काम्येते। सर्वैरपि देशस्य कृते परिश्रमः कार्यः। इयं रचना इदमेव वाञ्छति। इमे उभे अपि रचने अत्राङ्के प्रकाश्येते।

इटलीदेशे तुरीनोनगरे ३–८ अप्रैल २००० तारिकास्वायोज्यमाने एकादशतमे विश्व-संस्कृतसम्मेलने अर्वाचीनं/समकालिकं संस्कृतसाहित्यमवलम्ब्य न कापि कार्यशाला न चापि शोधपत्रवाचनगोष्ठी प्रस्तावितास्ति। एतत्सर्वं तदा भवति यदा सम्मेलनस्य आंदरार्होऽध्यक्षः डॉ० रामकरण शर्मास्ति यो हि स्वयमपि साहित्याकादेमीपुरस्कृतः प्रख्यातः संस्कृतकविरास्ते। अत्र दिशि मया तस्य ध्यानं मौखिकरूपेणाकृष्टमासीत्। तेन पत्रद्वारा एतत्कर्तुं मह्यं परामर्शो दत्त; मया च तत्र प्रमदितम्। इदानीमर्वाचीनसंस्कृतमाध्यमेन तं प्रार्थयामि अस्यां दिशि किमपि कर्तुम्। एकां संस्कृतकविगोष्ठीं संस्कृतपत्रिकासु प्रकाशितं साहित्यञ्चावलम्ब्य कार्यशालाञ्चायोजयितुं संयोजकान् प्रचोदयितुमिदानीमप्यर्हति डा० शर्ममहाभागः।

अर्वाचीनसंस्कृतस्य वर्षाणामेकविंशत्याः पूर्तावहमस्य लेखकेभ्यो मुद्रकेभ्यः क्रेतृभ्यो ग्राहकेभ्योऽक्षरयोजकेभ्यो डाककर्मिभ्यश्च वर्धापनानि प्रयच्छामि येषां सहयोगेन पत्रमिदमग्रे सरति; किञ्चानुदानदानार्थं राष्ट्रियसंस्कृतसंस्थानाय धन्यवादान् समर्पयामि यद्यप्यद्यावधि पत्रप्रकाशनार्थं गतवर्षीयोऽप्यनुदानराशिस्तेन न मुक्तः, का कथैषमस्तनस्यानुदानस्य? कथमिति चेन्नैव जानेऽहम्। अधिकारिण एवात्र प्रमाणम्। अस्तु यदागमिष्यति चैकपत्रं तदैव सधन्यवादं तत्स्वीकरिष्यामः।

अर्वाचीनसंस्कृतस्य समयेन प्रकाशनमसम्भवमेवाभविष्यद्यदि पं० चन्द्रभानशर्मा सपुत्रः सस्नुषश्चास्य अक्षरयोजनायां मुद्रणे च सेवाभावेन समर्पितो नाभविष्यत्। अस्मै तपस्विने गृहस्थायाहं धन्यवादान् समर्पयामि। पुनश्च कृतेऽपि यत्ने याः काश्चिदशुद्धयः पत्रे दृग्गोचरीभवेयु स्तदर्थं विदुषः क्षमां भिक्षमाणस्तावदस्मि।

सर्वेभ्यो दीपावल्याः नूतनवर्षस्य च शुभकामनाः सवर्धापनं समर्पयति–

विदुषामाश्रवः

१५–१०–१९९९

'रमालयः' आर–६, वाणी–विहारः,

नयी दिल्ली–११००५९

(रमाकान्त शुक्लः)

प्रधानसम्पादकः

प्रयागस्था राष्ट्रपतिपुरस्कृताः पं० चन्द्रभानुत्रिपाठिनः ५.६.१९९९ तारिकायां दिवंगताः। विगतेऽङ्के तेषां 'प्रभो कामयेऽहम्' इतीयं रचना प्रकाशिता बभूव। इतः पूर्वं लेखोऽप्येक प्रकाशितो जातः। तेभ्योऽस्माकं श्रद्धाञ्जलयः। –सम्पादकः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

शारदा-नुतिः

पं० प्रेमदत्तशास्त्री
शास्त्री कॉलोनी, जहाँगीराबाद (बुलन्दशहर)-२०२३९४

शुभ्रानना गुणवती सकलाधिराज्ञी, माता शुभा सकलमानवबोधदात्री ।
हस्ते च धारयति या रमणीयवीणां, सा शारदा वसतु मे रसनाग्रभागे ॥१॥
चन्द्रानने विमलभूषणवेषयुक्ते, हंसादिवाहनपरे नितरां सुवाद्ये !
गायन्ति सेवकजनास्तव कीर्त्तिराजिं, बुद्धिं प्रदेहि विमलां मयि शारदे त्वम् ॥२॥
आभ्यां फलं किमिह विस्तृतलोचनाभ्यां, याभ्यां न ते खलु कृतं तनुदर्शनं च ।
व्यर्थं भवेज्जननि ! मानवजन्म तेषां, येषां च कर्णतटयोः पतिता न वीणा ॥३॥

भारतमाता विजयतेतराम्

चित्ते यच्च विचिन्तयामि सततं पुण्यं ह्यपुण्यं तथा
वाचा यद्विपुलं वदामि भगवन् भद्रं ह्यभद्रं तथा ।
यन्नानाकरणैश्च कर्म नियतं स्वार्थे परार्थेऽथवा
तत्सर्वं तव पूजनं प्रतिपलं प्रीत्या प्रसन्नो भव ॥१॥
भक्त्या वन्दनमर्चनं ह्यनुदिनं देवादिनां पुण्यदम्
भद्रं संस्मरणं तथैव महतां श्रेयस्करं शान्तिदम् ।
श्रीमीरानरसिंहनानकवराः गांधी च हेड्गेवरः
स्मर्यन्ते तुलसीकबीरसहिताः राष्ट्रोन्नतिप्रेरकाः ॥२॥
वयं हिन्दवो मुस्लिमाः पारसीयाः वयं सिख्खबौद्धस्तथा खिस्तयश्च।
परं मूलतस्सर्वथा भारतीयाः वराः राष्ट्रसेवाकृते सत्त्वशीलाः ॥३॥
आसेतुहिमाचलमात्मगतं भेदैश्च विना वरमैक्यमलम् ।
राष्ट्रं मम जाने भव्यतमं प्राचीनतमं तत् तीर्थसमम् ॥४॥
भारते भा-रते भा-रतं संस्कृतं
नैष्ठिकैः काव्यदक्षैर्वरैर्भावितम् ।
भद्रभावैश्शुभां शारदायाः कृपां
प्राप्य ऋद्धिं गतं गुर्जरं सौख्यदम् ॥५॥

गांधी जयन्ती
२ अक्टूबर, १९९८

-डॉ० वासुदेव वि० पाठक 'वागर्थः'
३५४, सरस्वती नगर, कर्णावती (अमदाबाद)-३८००१५

(भारतीय संस्कारधाम, पोरबन्दर शाखा-समायोजिते 'गांधीगौरवगान'-कार्यक्रमे प्रस्तुता राष्ट्रवन्दना)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

योऽयं कृतः शपथस्त्वया

डॉ० रमाकान्त शुक्लः
'रमालयः' आर-६, वाणी-विहारः,
नयी दिल्ली-११००५९

योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?
यदिदं प्रतिज्ञातं त्वया तस्याशयं जानासि किम् ?
कर्तुं यथा सरलस्तथा शपथो न निर्वोढुं सखे !
शपथस्य निर्वाहो भवति कण्टकपथानुसृतिः सखे !
त्यक्त्वा सुमान्यालिङ्गसे कटुकण्टकान्, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?
व्यालीवदनचुम्बनमिदं करवालधारालेहनम्
क्षुरधारया पदमित्रता मधुराशया गरलाशनम्
त्यक्त्वा सुखदतल्पं सखे ! भूमौ स्वपिषि, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?
शपथं विधाय सखे ! त्वया हस्तौ निगडबद्धौ कृतौ
शपथं विधाय सखे ! त्वया पादौ निगडबद्धौ कृतौ
बद्धोऽसि वचसा कर्मणा मनसा त्वमिति, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?
नो लप्स्यसे निद्रां निशायां नापि दिवसे निर्वृतिम्
चिन्ताप्रतान्तविलोचनां त्वं द्रक्ष्यसे स्वामाकृतिम्
आमन्त्रितास्ते या विपत्तस्याः फलं जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?
शपथस्य पूर्त्यर्थं त्वया पेयं भवेद्गरलं मुदा
शपथस्य पूर्त्यर्थं त्वयाऽध्यवसाय आराध्यः सदा
शपथस्य रक्षार्थं त्वयार्प्यं जीवनं, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

ज्यायान् कनीयान् वा भवेच्छपथो गृहीतो मानवैः
तद्रक्षणार्थं लौहचणकाश्चर्वणीया मानवैः
शपथान्मनाक् प्रचलन्ति नो सत्यव्रताः, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

यैः पूरितः शपथो निजस्ते लोकवन्द्याः सम्मताः
यैः पूरितः शपथो नरा इतिहासपुरुषास्ते मताः
शपथस्य भेत्ता कथ्यते जीवन्मृतो, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

शपथो न कर्गलखण्डलिखितायास्तु पङ्क्तेर्वाचनम्
शपथोऽस्ति पीडासन्ततेरानन्दसहितं पाचनम्
शपथोऽस्ति मनसः कर्गले स्वात्माङ्कनं, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

शपथो न केवलमस्ति वाण्या वर्णमात्रोच्चारणम्
शपथस्तु बन्धो ! कथ्यते पञ्चाग्नितपसो धारणम्
होतव्य आत्मा मानवैस्तत्पूर्तये, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

मनसाथ वचसा कर्मणा भिन्ना भवन्ति न ये जनाः
सम्मानभाजनतां जगति ते यान्ति सर्वेषां जनाः
क्षतवाग्जनो निन्द्यो भवति लोके, सखे ! जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

शपथेन बद्धा नो जना निजलाभचिन्तां कुर्वते
न हि ते स्वशपथापेक्षया निजजीवनं बहु मन्वते
स्नेहं दयां सौख्यं न ते गणयन्ति, भण, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

लोभेन भयतः कामतो वा यो निजं शपथं त्यजेत्
शपथेन साकं स हि पुमान् निजजीवनं न हि किं त्यजेत् !
शपथस्य रक्षा ह्यात्मजयतो जायते, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विस्मृत्य शपथं ये जनाश्चातुर्यखेलां तन्वते
चिन्वन्ति ते कामं धनं, न हि ते यशः किल चिन्वते
सम्भावितस्याकीर्तिरतिमृत्युर्भवति, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

ये वञ्चयन्त्यनिशं जनान् शपथं गृहीत्वा मानवाः
आत्मानमथ सर्वेश्वरं जानन्ति नो ते मानवाः
मिथ्याव्रतानां लुप्यते तेजो मुखाज्जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

अधुना यदा शपथः कृतस्त्वयका तदायं रक्ष्यताम्
प्रत्यक्षरं शपथस्य बन्धो ! रक्षणीयं, रक्ष्यताम्
उच्चैः स्वरेणास्मत्पुरो यदवादि तज्जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

सम्प्रति शपथरक्षार्थमात्मा पीडनीयो रे ! त्वया
विस्मृत्य निजसौख्यं सखे ! लोकः समाराध्यस्त्वया
ईशः शपथकाले त्वया साक्षीकृतो जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

रक्ष प्रतिज्ञामात्मनो वर्धय तपः स्वं प्रत्यहम्
शपथं हि पूरय शुद्धमनसा, ते हितं कथयाम्यहम्
सम्पूर्य शपथं लप्स्यसे सुयशः स्थिरं, जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

रक्ष्येत शपथस्तावकोऽक्षरशो मयेदं काम्यते
सोढ्वापि कष्टं सफलतां विन्देति बन्धो ! काम्यते
नैवोत्सहे त्वां भग्नशपथं द्रष्टुमिति जानासि किम् ?
योऽयं कृतः शपथस्त्वया तस्यार्थमपि जानासि किम् ?

(रचनातिथिः १३-१०-१९९९ रात्रौ ८-०० वादनतः १२-०० वादनं यावत्. निशीथे दिल्ली-शिमला मार्गे)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भारतीयशासनं विजयताम्

'अभिराज' डॉ० राजेन्द्र मिश्रः
११४, टीचर्स होस्टल, समर हिल,
शिमला-१७१००५

भारतीयशासनं विजयताम् सत्यमेव जयताम् !!
अविश्रमं खलु जनतातन्त्रम्
लक्ष्यीकृतजनसेवामन्त्रम्
प्रकृतिरञ्जनाद्राजा भूत्वा श्रियं कोऽपि लभताम् !
सत्यमेव जयताम् !!
निखिलविश्वमार्यं कुर्वाणा
कल्पितजनजनसुखकल्याणा
भारतीयसंस्कृतिः पुराणी पुनर्नवा तनुताम् !
सत्यमेव जयताम् !!
शस्त्रे शास्त्रे भवतु कौशलम्
क्षमाभावभूषितं स्याद् बलम्
नहि दैन्यं न च पलायनं रणनीतिरिति ध्रियताम् !
सत्यमेव जयताम् !!
संरक्षिताः सन्तु सीमानः
स्पृशतु नभो भारतसम्मानः
काञ्चनविहगगौरवं भूयो राष्ट्रमिदं श्रयताम् !
सत्यमेव जयताम् !!
सर्वोदयनिरता सुरवाणी
निगमागमसंश्रिता पुराणी
सरस्वती श्रुतमहती राष्ट्रे हृदि-हृदि महीयताम् !
सत्यमेव जयताम् !!
राष्ट्रहितं सर्वोपरि भवतात्
राष्ट्रगौरवं स्फुरतु समन्तात्
मुक्ताकाशे ध्वजस्त्रिवर्णो यशोऽक्षतं दधताम् !
सत्यमेव जयताम् !!

रचनातिथिः १४.१०.१९९९ ई० पूर्वाह्णे १० वादने।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

पटेलमञ्जरी : एकं निरीक्षणम्

गिरिशः जानी
सहायक-निदेशकः,
अनुस्नातक-संशोधन-विभागः, भारतीयविद्याभवनम्,
कुलपतिमुंशीमार्गः, मुम्बई-४००००७

अर्वाचीनभारतस्य लोकनायकानां पङ्क्तौ सरदारवल्लभभाईपटेलमहोदय-स्याभिधानं सुख्यातिं भजते। यथा सार्वकारीयतन्त्रे तथैव स्वातंत्र्योत्तरसंस्कृत-साहित्येऽपि श्रीपटेलमहाभागस्य तादृशं स्थानं प्रदत्तं न ज्ञायते यथा प्रदातव्यमस्ति, यद्यपि भारतीयानां हृदयसिंहासने श्रीपटेलमहोदयः सादरं विराजते।

महाराष्ट्रराज्यस्य यवतमाल-मण्डलस्य पुसदग्रामनिवासिना श्रीजयेश वी. पल्लेवार-नामक-कविना श्रीपटेलपुण्यस्मृतावेका पटेलमञ्जरीति काव्यकृतिः विरचिता। भारतीयविद्याभवनस्य संस्कृतत्रैमासिकी संवित्पत्रिकाया एकोनत्रिंशद्वर्षीये संयुक्ताङ्के त्रिनवत्यधिकैकोनविंशशततमे (१९९३) खीष्टाब्दे पटेलमञ्जरीयं प्रकाशिता।

द्वादशाधिकशतंश्लोकविस्तीर्णेऽस्मिन् पटेलमञ्जरी-लघुकाव्ये कविः श्रीपटेलमहोदयस्य चरितमालिखत्। श्रीवल्लभेतिशब्दस्य पटेल-नारायणोभयार्थं विभावयन् कविः तौ द्वौ सममेव नमति। प्रजातंत्रेऽस्मिन् भारते प्रजा एव प्रभुरिति सूचयन् कविः प्रजाशब्देनैव काव्यमंगलारंभं करोति।

प्रजानां निर्भयस्थानं जनहृदयवल्लभम् ।
रक्षकं कृत्स्नलोकानां दैत्यारिं पुरुषोत्तमम् ॥१॥
विष्टरश्रवसं श्रेष्ठं राजचक्रस्य वाहकम् ।
बिन्दूकृतबलिराजं श्रीवल्लभं नमाम्यहम् ॥२॥

'अन्वयः'-इतिशीर्षके षट्पद्येषु कविः श्रीपटेलस्य जन्मभूमेः पित्रोश्च परिचयं कारयति। तदनु कविः श्रीपटेलव्यक्तित्वस्य चित्ताकर्षकं चित्रणं कुरुते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

विशालकायः कमनीयकान्तिः बलिष्ठबाहुः किल लोहधर्म्यः ।
अतीव धीरः समरप्रवीणः क्षमान्वये वल्लभ एष जातः ॥६॥

अत्र क्षमायाः धरायाः पुत्रस्य कृषकस्य वंशे अस्य वीरस्य जनिरभूदिति कविकथनाशयः।

'संस्काराः'–इतिशीर्षके श्लोकस्तबके कविः श्रीवल्लभस्य विद्याध्ययनं महात्मगांधिसमागमञ्च वर्णयति। करमसद-पेटलाद-नडियादादिस्थलेषु श्रीपटेलस्य शिक्षाभ्यासोऽभवत्। बाल्यादेव श्रीपटेलस्य सर्वतोमुखी प्रतिभा समुदिताऽऽसीदिति निदर्शयन् कविः कवयति–

आङ्ग्लभाषाप्रियश्चासौ पठने हि पुरोगमः ।
चतुरश्चतुरंगेऽसौ क्रीडाभ्यासे समानधीः ॥९॥

विधिज्ञपदवीप्राप्त्यर्थं श्रीपटेलः इंग्लैण्डदेशं गत्वाऽध्ययनमकरोद् बैरिष्टरपदञ्चाप्नोत्। अत्र कवेः श्लोकोऽयम् एकः कथातत्त्वेन सह विसंवदति–

श्रीमोहनस्य शिष्योऽभूत् द्रोणाचार्यमुनेर्यथा ।
भिल्लशिष्यैकलव्यस्तु प्रतिमापूजको गुरोः ॥१२॥

श्लोकेऽस्मिन् वर्णिता तुलनास्थितिः सर्वथा असम्बद्धा एव वर्तते यतो हि पुर एव कविः भणति–

अयं कार्पाससूत्रेण स्वराज्यं प्राप्तुमिच्छति ।
इत्येव परिहासेन वल्लभेन विडंबितः ॥१३॥

पूर्वं श्रीपटेलस्य मनसि गान्धिसम्बन्धिन्याश्छवेः कीदृशी स्थितिरासीदिति स्पष्टमेव तथ्यमास्ते। तदनु अननेनैव गांधिमहोदयेन सह तस्य हार्दिकः सम्बन्धः समभूत्। अत एव कविः कथयति–

मोहनदासगान्धी सः तस्याभवद्गुरुवरः ।
गुरुशिष्यानुबन्धोऽयं खलु विस्मयकारकः ॥१४॥
गुरुः सिद्धान्तमार्तण्डः महात्मा चातिमानवः ।
व्यवहारपटुः शिष्यः वल्लभो लौकिको नरः ॥१५॥

आदर्शमूर्तिनां सह व्यवहारमूर्तेः सुभगः संगमोऽयं नूनं सर्वेषां कृते विस्मयावहः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'मानपदानि'–शीर्षके पद्यगुच्छे कविः श्रीपटेलाय समर्पितमानसम्मानानां विवरणं प्रस्तौति। श्रीपटेलस्य गुर्जरप्रदेशकाँग्रेसदलाध्यक्ष्यं, गुर्जरमहाराष्ट्रसौराष्ट्रादि-स्थलेषु राजसभाध्यक्षत्वं, करांचीपत्तने राष्ट्रियकाँग्रेसदलप्रामुख्यं, अलाहाबाद-मुंबईत्यादिस्थानेषु नागरिकसम्मानम्, अलाहाबाद–नागपुर–बनारस–उस्मानिया–विश्वविद्यालयप्रदत्त–मानार्ह–'डॉक्टर'–पदवीसमर्पणं, स्वतंत्रराष्ट्रस्य प्रथमोप-प्रधानमंत्रि–गृहमंत्रिपदसम्मानमिति मानसम्मानानि कविः वर्णयति।

मानधनस्य श्रीपटेलस्य गुणगरिम्णि कविः पद्यमिदं प्रस्थापयति–

कठोरता (?) कटुता नयकर्मणि कुशलता नवदेशसुशिल्पने ।
चतुरता विदिता जनसंयुगे निपुणता नृपसंघविघट्टने ॥२६॥

'व्यक्तिदर्शनम्'–इत्याख्यपद्यसम्पुटे कवि श्रीपटेलस्य व्यक्तित्ववैशिष्ट्यानि दर्शयति। तस्य भाषाविषये कविः कथयति–

अप्रभुत्वेऽपि भाषायां भाषा भूरिप्रभाविनी।
अन्तरात्मप्रभुत्वेन प्रसभं प्रतिपादिका ॥२८॥
नारिकेलसमा तस्य भाषा बाह्यांगकर्कशा ।
मृदुलोदरभूतेन स्नेहस्निग्धा मनोहरा ॥२९॥

श्रीपटेलस्य विविधकार्यावताररूपाणि दर्शयतीत्थं कविः–

गान्धेः दक्षिणहस्तोऽसौ लोहहस्तः प्रशासने ।
वामहस्तो हि वामानां मृदहस्तः प्रजां प्रति ॥३१॥

अत्र महात्मनः प्रधानानुयायी, प्रशासनाश्वस्य समर्थारोहकः, शठं प्रति शाठ्यमितिमंत्रधृक् व्यवहारविद्, प्रजावत्सलश्च पटेलमहाशयः बहुविध-वैशिष्ट्यभांगिति दृक्पथमायाति।

भारतस्वाधीनतासंग्रामस्य सामरिकत्रिपुटी कीदृशी आसीदिति कविः दर्शयति–

महात्मा मोहनो गांधी चतुरश्चतुराननः ।
शान्तिस्थापको लालः विष्णुरिव जवाहरः ॥३३॥
रुद्रावतारपाटीलः शंकर इव शंकरः ।
भारतस्य त्रिरत्नानि रेजिरे राजवर्तुले ॥३४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

नेहरूपटेलयोः मतभिन्नतां प्रदर्शयन् कविः ब्रूते—

कलहौ द्विविधौ प्रोक्तौ शुभाशुभंकरौ यथा ।
नेहरूवल्लभयोर्वादः शुभो हि परिणामतः ॥३५॥
नेहरूवल्लभयोर्मध्ये प्रथिता मतभिन्नता ।
एकतया निमग्ना सा राष्ट्रीयभावनार्णवे ॥३६॥

भारतस्य प्रधानामात्यपदार्थं सर्वथा समुपयुक्तोऽपि श्रीपटेलः विधिवशात्तत्पदं नालमकरोत्। तद्विषये कविः भणति—

नाभूदसौ स्वयं राजा राजपदव्यकामुकः ।
अभवद्राजनिर्माता स्वयं निस्पृहवल्लभः ॥३७॥

श्रीवल्लभमूर्तिमादरेण नमन् कविः पुनरुक्तिमविगणय्यापि कथयति—

बलिष्ठकायो वचसा कठोरः नीतिप्रवीणो विनयप्रधानः।
कार्येषु निष्ठ स्वजनेषु मिष्ठः प्रशासने लोहमयप्रहस्तः ॥४०॥

सन्ततमाशावांदप्रदानचतुरान् नेतॄन् मनसि कृत्य कदाचित्कविः सत्यमिदं नः पुरस्तात् प्रस्थापयति—

कृतिप्रधाना सततं हि वृत्तिः उक्तिप्रधाना न कदापि वृत्तिः ।
कृतिप्रधानं नरजीवनं हि कीर्तिप्रधानं भवतीति सत्यम् ॥४१॥

'जीवनकार्यम्'-इतिशीर्षके पद्यसञ्चये कविः श्रीपटेलस्य जीवनं संक्षेपतः निभालयति। विधिज्ञव्यवसाये नेतुरस्य सामर्थ्यं साफल्यञ्च निरुपममासीत्—

दण्डाभियोगे प्रसभं प्रवीणः प्रभावशाली नययुक्तिवादे ।
दण्डाभियोगे कुशलप्रयुक्त्या सदा विजेता किल दण्डवादे ॥४५॥

सफलवृत्तिमेनां परित्यज्य श्रीपटेलः सम्पूर्णरूपेणैव राष्ट्रसेवाकर्ये निमग्नः।

विपुलविभवप्राप्तिं विधिज्ञव्यावसायिकीम् ।
देशकृते परित्यज्य बभूव देशसेवकः ॥४७॥
ग्रामविकासकार्येण सार्वजनिकजीवनम् ।
प्रारब्धं सरदारेण यथेप्सितं महामना ॥४९॥

स्वाधीनतासंग्रामे नैकवारमयं नरशार्दूलः कारागारे निबद्धः—

स्वराज्यप्राप्तिसंघर्षे करागारं मुहुर्मुहुः ।
सिषेवे सरदारोऽयमात्मनिवाससंनिभम् ॥५२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तस्य बन्दीगृहे वासः बभूव सुखदः सदा ।
धर्मग्रन्थस्य पाठेन संस्कृताध्ययनेन च ॥५३॥

बारडोलीसत्याग्रहनायकस्य श्रीपटेलस्य चित्रणमिदं मनः कर्षति–

गौरांगशास्तृनिहिंता कुवृत्त्या करस्य वृद्धिरसमर्थनीया ।
कृषीवलानां बहुकष्टदात्री आन्दोलनार्थं कृतनिश्चयोऽसौ॥५९॥

करभारनिषेधार्थं पुरस्कृतं महात्मना ।
आन्दोलनप्रकर्षेण गौरांगैः निष्फलीकृतम् ॥६१॥

तथापि सरदारेण पुनश्च तत्पुरस्कृतम् ।
यस्य विराट्स्वरूपेण गौरांगास्तु पराजिताः ॥६२॥

राज्यशतानामेकीकरणरूपं भगीरथकार्यं श्रीपटेलेन अपूर्वदाक्ष्येन चतुर्विधोपायप्रयोगपुरःसरं सम्पादितम् । विषयममुं कविः 'महाराजानां समस्या'–इतिशीर्षके पद्यकदम्बे प्रस्तौति–

हिन्ददेशीयराज्यानामविलम्बं निराकृता ।
समस्या सरदारेण नयपटुतया भृशम् ॥६५॥

वल्लभपाटिलं दृष्ट्वा सिंहासने कृतासनम् ।
सिंहं दृष्ट्वा यथा व्याघ्रा त्यक्त्वाऽऽसनं पलायिताः॥६७॥

श्रीपटेलस्यातुलं कार्यचातुर्यमालिखन् कविः भणाति–

स्वदेशं नयते पूर्वं स्वयं चरति दक्षिणे ।
पश्चिमां नयते वामान् उत्तरदिग्धृतासनः ॥६९॥

कृषीवलान्वयनन्दनोऽयं श्रीवल्लभः विलक्षणं कृषिकार्यमाततान–

कृषकस्य कुले जन्म हिंदभूमौ तु कर्षणम् ।
कृषिफलमपाकृत्यावाप स्वाधीनताफलम् ॥७०॥

प्रधानामात्यश्रीजवाहरलालेन वारितोऽप्ययं महामनाः भारतीयसंस्कृति-धर्मधाम्नः सोमनाथदेवालयस्य जीर्णोद्धारकार्यं चकार–

पवित्रभूतस्य हि भारतस्य श्रीसोमनाथेश्वरमन्दिरस्य ।
विध्वंसितस्य प्रखरास्त्रघातैः मुस्लीमवीरस्य विघातकस्य ॥७१॥
उद्धारकार्यं सुनियोजितं च विधार्मिकशासनवाहकेन ।
जवाहरेण प्रतिरोधितोऽपि प्रारंभितं कर्मठवल्लभेन ॥७२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

तदनन्तरं कविः पटेलबन्धुद्वयस्य मनःकर्षकं चित्रणं पुरः दधाति–

अग्रजो विठ्ठलो बन्धुरनुजश्चास्ति वल्लभः ।
अग्रजानुजयोर्भेदः न परस्परभावने ॥८१॥

तयोः भिन्नमार्गित्वं प्रदर्शयन् कविः भणति–

एकः काँग्रेसपक्षीयः असहकारसाधकः ।
अन्यः स्वराज्यपक्षीयः सहकारमतानुगः ॥७५॥

बहुजनानुयायित्वमवाप्य स्वनियोजितम् ।
वल्लभेन कृतं कार्यं सततमविवादितम् ॥७६॥

बहुजनानुयायित्वमवाप्य स्वनियोजितम् ।
विठ्ठलेन कृतं कार्यमात्मविश्वाससंगिना ॥७७॥

भिन्नमतप्रवक्तारौ बन्धू स्वदेशसेवकौ ।
राष्ट्रभक्तिसुसंसिक्तौ भावयन्तौ परस्परम् ॥७८॥

भ्रात्रोरनयोः जीवनमंत्रं सूचयति कविः पद्येनानेन–

जीवनं सज्जनानां तु भवति द्रुमसंनिभम् ।
छायया सुखयन्त्यन्यान् घर्षन्तोऽपि स्वशाखया ॥८२॥

'विचारवाटिका'–इतिशीर्षके पद्यसमूहे कविः श्रीपटेलस्य जीवनदर्शनं परिचाययति–

सत्याहिंसायुते युद्धे तपश्चर्याश्रिते तथा ।
भवति न्यायसंग्रामे चोभयपक्षयोर्जयः ॥८१॥

विजयते सदा सत्यं सत्यासत्यरणांगणे ।
नास्ति सत्यस्य पर्यायः सत्यमस्ति सदामरम् ॥८२॥

श्रीपटेलस्य संघर्षपूर्णं जीवनं स्मरन् कविः वदति–

लभन्ते न विना कष्टं मनुजैः सततं सुखम् ।
सुखं लब्धं विना कष्टं न हि वसति नित्यशः ॥८४॥

न कश्चित्स्वाभिमानोऽस्ति परपोषितजीवने ।
उपहासास्पदं नित्यं परायत्तं हि जीवनम् ॥८६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

श्रीपटेलसदृशानां महापुरुषाणां कृते महादरः लोकहृदयेषु सदैव तिष्ठति–

लोकादरो मनुष्याणामधिकारानुयात्रिकः ।
आदरानुगतं ज्ञानमिति लोकपरंपरा ॥८८॥

बहुसंख्याकाः राजनेतारः कीदृशाः भवन्तीति विषये कविः सव्यङ्ग्यं वदति–

अशुभं हि शुभं मत्वा तिरस्करोति यः शुभम् ।
स एव राजनीतिज्ञः पुरस्करोति योऽशुभम् ॥१०२॥

किन्त्वल्पसंख्याकानां श्रीपटेलसमानां जीवनरीतिः अन्यैव भवति–

शरीरसौख्यं प्रति भोगमाप्तुं
विश्रामकालः न भवेत्सदीर्घः ।
सुदीर्घकालीनसुखाश्रयादि
श्रमाश्रितं जीवनमेव काम्यम् ॥१०६॥

'महाप्रयाण' मिति चान्तिमपद्यकदम्बे कविः श्रीपटेलस्य चरमयात्रां वर्णयति–

आयसमयकायोऽपि वल्लभो न निरामयः ।
आरामे न कदा रेमे आमयाघातितो सदा ॥१०७॥
व्यत्ययो न हि कार्येऽस्य व्याधिना व्यथितस्य च ।
विक्रियन्ते न कार्याणि व्यथनानि महीयसाम् ॥१०८॥

महात्मगान्धिनः हत्यया भृशमाकुलितः श्रीपटेलः कदापि पुनः स्वास्थ्यं सम्यक्तया न समवाप–

विद्धः सन् मृत्युना गान्धेः पीडितो मनसा भृशम् ।
रुधिरामयघातेन कृतान्तसदनं गतः ॥११०॥

पटेलमञ्जर्याः अन्तिमश्लोकद्वये कविः श्रीपटेलनिर्वाणजनितजनता-पीडामपूर्वेण प्रकारेण निदर्शयति–

लोहसमं कठोरं हि वल्लभस्य कलेवरम् ।
भस्मीकृतं कृतान्तेन विस्त्रष्टुं लोहभस्म किम् ॥१११॥
भस्मितलोहदेहाच्च लोहभस्म विसर्जितम् ।
करोति भारतीयानां तज्जीवनं निरामयम् ॥११२॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सम्भ्रान्ताः किममी जनाः

प्रभात कुमार शर्मा, संस्कृत-विभागः,
श्री चन्द्रधर गुलेरी महाविद्यालय हरिपुर, कांगड़ा-१७६०२८

गुरुहन्ताऽधुना शिष्यः भ्रातृहन्ता सहोदरः ।
पितृहन्ता श्रुतः पुत्रः वात्सल्यं खलु दूषितम् ॥१॥
श्वश्रूर्जाता वधूहन्त्री प्रियहन्त्री च सा प्रिया ।
पत्नीहन्ता पतिर्जातः बान्धवाश्चापि निर्दयाः ॥२॥
न दाम्पत्यं पवित्रं तद् जनानां सफलं मतम् ।
पतिव्रतामपि त्यक्त्वा तेषां वेश्यैव वाञ्छिता ॥३॥
न केवलं परस्त्री सा दूषिता दुर्जनैर्बलात् ।
अधमेनाद्य पित्रापि स्वकन्या यौनशोषिता ॥४॥
स्वार्थमवैधसम्बन्धं कृत्वा भ्रमन्ति ये जनाः।
अबोधान् नवजातान् तान् कस्मै त्यजन्ति ते पुनः? ॥५॥
व्यभिचाररतः इत्थं निकृष्टश्च पशोरपि ।
मनुजोऽद्य कथं जातः निवसन् शिक्षितोऽपि सः? ॥६॥
उन्मत्ताः पापिनः क्रूराः सन्तोऽसामाजिकास्तथा ।
नैतिकमूल्यहीनाश्च सम्भ्रान्ताः किममी जनाः? ॥७॥

द्विपादिका

डॉ० रश्मिकांत व्यासः, भारती भवनम् (महाकाल), उज्जैन

घनघोरबिन्दुपातः गर्जनेषु सौदामिनी प्रकाशते मुहुः ।
तद्वत् त्वदीया स्मृतिः हृत् शूलयति वारम् ॥
वर्षायाः बिन्दुपातः मनो मे मोदयति ।
यथा कचिद् भ्रमरः शिशुन्मुन्मनीकरोति ॥
श्रावणस्य बिन्दुपातेषु चित्तं मे सजलम् ।
खजुराहो-सद्यःस्नाता-प्रतिमायाः तनुरिव प्रतिभाति॥
प्रचण्डे प्रावृषि न कोऽपि यदा दृष्टिपथमायाति ।
तस्मिन्नगच्छेत् क्वापि चेत् स्वर्णकादम्बिनी ॥
अंजनं वर्षति नभसि विरामगतः सर्वोऽपि यातायातः ।
यदा त्वया निवर्तितं मुखं हृदि शूलः लग्नः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

व्योमशेखर की "अहं राष्ट्री" : शिल्प और संवेदन

श्रीमति शशि चौहान
उपप्रधानाचार्या
भ०प्र० ओमर बालिका इण्टर कालेज, बांदा

डा० विशनलाल गौड 'व्योमशेखर' की 'अहं राष्ट्री' संस्कृत की आधुनिक कविता के क्षेत्र में अपनी शैली की एक अलग ही प्रकार की गीति रचना है। इस गीति रचना के शिल्प और संवेदन की समीक्षा करने से पूर्व यह आवश्यक अनुभव होता है कि गीति काव्य की प्रवृत्ति और संस्कृत साहित्य में गीतिकाव्य की परम्परा पर एक विहंगम दृष्टिपात कर लिया जाये।

प्राचीन संस्कृत काव्यशास्त्र में गीतिकाव्य समीक्षा की न्यूनता

संयोग की बात है कि संस्कृत के काव्यशास्त्रियों ने गीति रचना के बारे में काव्य की सामान्य प्रवृत्तियों से बाहर कोई अधिक गंभीर विचार नहीं किया। यद्यपि यह सत्य है कि गीति का उदय ऋग्वेद की ऋचाओं के साथ ही हो गया था। ऋग्वेद के सोमगीत, उषागीत और उर्वशी तथा पुरूरवा के प्रेमगीत गीति रचना के आदिम रूप कहे जा सकते हैं। हम यह भी देखते हैं कि सामान्य ऋचाओं से हटकर गेयतायुक्त ऋचाओं को 'साम' नाम भी वैदिक युग में मिल गया था–गीतिषु सामाख्या। परन्तु हमें यह सत्य स्वीकारने में कोई हीनता बोध नहीं होना चाहिए कि गीति रचना को लेकर सामान्य काव्य रचना से भिन्न किसी विशेष दृष्टि की मीमांसा हमारे संस्कृत काव्य शास्त्र में नहीं की गयी। इसका एक कारण संभवत यह हो सकता है कि संस्कृत काव्य में प्रबन्ध रचना का आधिक्य रहा और गीति रचना उसका ही एक रूप मान ली गयी और उसकी तुलना में वह गौण होकर रह गयी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गीतिकाव्य समीक्षा का उदय

अठारहवीं-उन्नीसवीं शती में जब भारतीय साहित्यकारों और साहित्य समीक्षकों के लिए पाश्चात्त्य साहित्य का संपर्क मिला तो कविता की गीति विधा के बारे में स्वतंत्र रूप से समीक्षा के द्वार खुल गये । पाश्चात्त्य संस्कृत विद्वानों ने पहली बार मेघदूत और ऋतुसंहार जैसी रचनाओं का महाकाव्य से पृथक् गीतिरचनाओं के रूप में रखा । इसके बाद भारतीय विद्वानों ने भी गीतिकाव्य को महाकाव्य रचनाओं से पृथक् जांचना-परखना आरम्भ कर दिया और कुछ नये गीतिकाव्यों की रचनाएं भी निरन्तर प्रकाश में आने लगीं ।

गीतिकाव्य की मुख्या प्रवृत्तियां

गीतिकाव्यों को दृष्टिगत करते हुए आधुनिक समीक्षकों ने गीतिरचना की जिन मुख्य प्रवृत्तियों का उल्लेख किया है उनमें कवि का भावातिरेक, मुक्त कल्पना, इतिवृत्त का अभाव, गेयता, इन्द्रियों को तृप्ति देने वाले बिम्बों की योजना, भाषा की सरलता और तरलता प्रमुख हैं । इन्हीं विशेषताओं के कारण कोई गीतिरचना यदि लघु मुक्तक के रूप में है तो भी वह पाठक या श्रोता का वशीकरण कर लेती है । गीतिरचना कवि की आत्मा का भावातिरेक है । इसमें रचनाकार कहीं बाहर से कथा कथ्य तनिक भी नहीं पकड़ता । उसका जो निजी भावसंसार है, वही उसकी गीति का कथ्य होता है । एक गीतिरचना से बढ़कर कवि की आत्माभिव्यक्ति का कवितारूप दूसरा नहीं हो सकता । यही कारण है कि सबसे अधिक प्रभावी और मर्मस्पर्शी प्रणय गीतों की रचनाएं गीतिकाव्य के रूप में ही मिलती हैं ।

गीतिरचना में कवि किसी भी प्रकार के इतिवृत्त के प्रबन्धसार से सर्वथा मुक्त होता है । उसकी रचना में अनुभूतियों के आवेग के अनुरूप कल्पना की मुक्त उड़ान और संवेदनाओं में छाये सौन्दर्य को सघनता देने वाले कमनीय बिंबविधान आदि की पूरी स्वतंत्रता रहती है । अपनी इसी विशेषता के कारण एक अच्छी गीति रचना इन्द्रियों को तृप्ति देने वाले सुन्दरतम चित्रों की माला प्रतीत होती है ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

एक सुन्दर गीति रचना कवि की निजी भावानाओं का उत्तेजक कोई क्षण होता है या कहना चाहिए कि किसी क्षण विशेष की कोई आवेगमयी भावमुद्रा होती है जिसका विस्तारण एक गीतिकाव्य के रूप में होता है। विस्तारण का आयाम भी भावमुद्रा के क्षण की आयति पर निर्भर करता है। यदि वह आयति अधिक विस्तार वाली नहीं है तो गीति रचना एक मुक्तक या लघु गीत के रूप में भी हो सकती है, और यही भावमुद्रा की आयति का विस्तार अधिक है तो वह अनेक छन्दों की एक शृंखला भी हो सकती है।

गीतिकाव्य जैसा कि इस नाम से ही अन्वर्थ निकलता है, एक विशेष प्रकार की गेय रचना का नाम है। वैसे तो साहित्य की सभी रचनाओं के गद्य– पद्य भेद का आधार रचना का छन्दबद्ध और छन्दमुक्त होना ही है। किन्तु यह होने पर भी हमें यह जान लेना चाहिए कि सभी पद्य रचनाएं गीतिकाव्य कहलाने की अधिकारी नहीं होती। गीतिकाव्य का प्राणतत्त्व वास्तव में उसकी गेयता है। यह गेयता सभी छन्दों में एक जैसी कभी नहीं हो सकती। कुछ छन्द केवल गद्य का भेद कर सकते हैं। वे गीतिरचना के लिए अधिक समर्थ नहीं माने जा सकते। कुछ छन्द प्रकृति से अधिक गेय होते हैं, निश्चित रूप से उनका प्रयोग एक अच्छी गीति रचनाओं को जन्म दे सकता है।

कवि का आन्तरिक भावस्पन्द ही गीतिरचना के छन्द का निर्धारण करता है। उदाहरण के लिए हम कालिदास के मेघदूत के 'मन्दाक्रान्ता' छन्द को देख सकते हैं। वर्षा के वियोगगीत की भावभूमि के लिए यह छन्द अपनी हिलोरों के कारण बहुत ही अनुरूप होता है। यह सावन की मल्हार जैसा गेय लगता है। इसी प्रकार हम देखते हैं कि उदात्त प्रकार की भावानुभूतियों की अभिव्यक्ति के लिए 'शिखरिणी' छन्द गीति रचना के बहुत अनुरूप होता है। आचार्य शंकर की 'सौन्दर्यलहरी' और पण्डितराज जगन्नाथ की 'गंगालहरी' जैसी सुन्दर गीति रचनाओं में शिखरिणी छन्द का ही प्रयोग मिलता है।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संस्कृत गीतिकाव्य की परम्परा

संस्कृत के गीतिकाव्यों की परम्परा का प्रारम्भ विद्वान् लोग कालिदास के मेघदूत से मानते हैं। वैसे कहीं दूत काव्य, कहीं लहरी काव्य और कहीं शतककाव्य के रूप में संस्कृत की गीति परम्परा के अनेक भेद मिलते हैं। प्राचीन गीतिकाव्यों में कालिदास का मेघदूत, धोयी का पवनदूत, अमरु का अमरुकशतक, भर्तृहरि का शृंगारशतक, बिह्लण की चौरपंचाशिका तथा शंकराचार्य और पण्डितराज जगन्नाथ आदि की लहरी रचनाएं गीतिकाव्य के भिन्न भिन्न प्रतिदर्शों के रूप में देखी जा सकती है।

संस्कृत गीतिकाव्य की आधुनिक धारा

देश की स्वतन्त्रता के बाद संस्कृत के आधुनिक रचनाकारों ने भी अपनी अपनी शैली के अनेक गीतिकाव्यों की रचनाएं की हैं। शतक काव्यों की संख्या तो पिछले पचास वर्षों में सौ की संख्या को भी पार कर गई प्रतीत होती है। परन्तु इन शतक काव्यों में से गीतिकाव्य कहे जाने की योग्यता कुछ में ही हो सकती है, सभी में नहीं।

संस्कृत के वे रचनाकार जो नये युगबोध और दूसरी भाषाओं के गीति साहित्य से प्रभावित हैं, नये से नये प्रकार की गीतिरचना कर रहे हैं। इस प्रकार की गीति रचनाएं कुछ अर्थों में प्रयोगवादी कही जा सकती हैं। संस्कृत की प्रयोगवादी गीति रचनाओं में अंग्रेजी के सॉनेट, उर्दू की गजल और हिन्दी के मुक्त छन्द के प्रयोग बड़ी सफलता के साथ किये गये हैं। इस तरह की प्रयोगवादी गीतिरचनाएं करने वाले रचनाकारों में अभिराज राजेन्द्र मिश्र अग्रणी हैं। उन्होंने लोकगीतों की धुन में भी संस्कृत की प्रभावी गीतिरचनाएं की हैं।[५] व्योमशेखर की अग्निजा में भी अनेक प्रयोगवादी गीतिरचनाएं हैं। गजल और अन्य प्रकार की प्रयोगवादी रचना करने वालों में जगन्नाथ पाठक, राधावल्लभ त्रिपाठी, रमाकान्त शुक्ल तथा श्रीनिवास रथ जैसे गीतिकार प्रमुख हैं।[६] और भी अनेकों गीतिकार हैं जिनकी रचनाएं पत्रिकाओं के माध्यम से[७] तथा कुछ की आकाशवाणी और दूरदर्शन के माध्यम से समय-समय पर प्रकाश में आती रहती हैं। रमाकान्त शुक्ल का 'भाति मे भारतम्' इस दिशा में अत्यन्त लोकप्रिय गीतिकाव्य सिद्ध हुआ है।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

'अहं राष्ट्री' का शिल्प

संस्कृत की आधुनिक गीतिकाव्य धारा को सामने रखकर जब हम व्योमशेखर की 'अहं राष्ट्री' के शिल्प और संवेदन की समीक्षा करते हैं तो हम पाते हैं कि उनके इस गीतिकाव्य में परम्परा और नवीनता का एक मनोहर गंगाजमनी संगम है। परम्परा से प्राप्त तत्त्वों का विचार करें तो इसका 'अहं राष्ट्री' नाम ही ऋग्वेद के राष्ट्री सूक्त से ग्रहण किया गया है।[6] यदि इस नाम के प्रयोगशिल्प को देखें तो यह परम्परा से हटकर है, सर्वथा नवीनतम है। संस्कृत काव्य रचनाओं के संदर्भ में इस तरह का नाम शिल्प एक नया प्रयोग है। नाम का यह शिल्प उसी तरह नया है जैसे हिन्दी कवि केदारनाथ अग्रवाल की एक काव्यकृति का नाम "हे मेरी तुम" है।

'अहं राष्ट्री के' शैली शिल्प पर जब हम ध्यान देते हैं तो हमें निरुक्तकार यास्क की यह बात याद आती है कि शैली की दृष्टि से वेद की ऋचाएं तीन प्रकार की हैं-प्रत्यक्षकृत, परोक्षकृत और आध्यात्मिकी। यह भेद वास्तव में ऋचाओं की शैली का भेद है। जिन ऋचाओं में कवि अपने वर्ण्य या सम्बोध्य पात्र को अपने अभिमुख या प्रत्यक्ष अनुभव करके उसे सीधे तुम की भाषा में बोलता है तो वह शैली प्रत्यक्षकृत होती है। यह शैली गीतिरचना के लिये बहुत ही प्रभावी होती है। क्योंकि इसमें कवि अपने सम्बोध्य के साथ सीधे-सीधे संवाद करता है। मेघदूत की गीतियां इसी शैली में मिलती हैं। संस्कृत गजलकारों ने उर्दू गजल के प्रभाव से अनेकत्र इसी शैली का प्रयोग किया है। परोक्षकृत शैली एक प्रकार से तटस्थ होकर वर्णन करती है। इसमें रचनाकार का अपना आपा नहीं घुल पाता। फलतः इसका प्रभाव भी कुछ मंद होता है। यह शैली प्रबन्धकाव्यों के लिये तो ठीक है गीतिकाव्य के लिये अधिक प्रभावी नहीं मानी जा सकती। आध्यात्मिकी शैली का दार्शनिक अध्यात्म से कुछ अधिक लेना-देना नहीं है। इसका सीधा-सीधा तात्पर्य रचनाकर द्वारा अपनी 'अस्मिता' अर्थात् 'अहंगत' अनुभूति को केन्द्र में रख देना है और अनुभूतियों की अभिव्यक्ति 'मैं' के माध्यम से करना है। इस शैली में रचनाकार अपने आत्मभाव को वर्ण्य पात्र के 'मैं' का रूप भी दे सकता है। व्योमशेखर ने 'अहं राष्ट्री' में

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

इसी आत्मगत शैली को अपनाया है। रचनाकार ने भारत राष्ट्र की अस्मिता अर्थात् आत्मा में अपने 'मैं' का विलय कर दिया है। इसीलिये उनकी 'अहं राष्ट्री' अपनी शैली की एक अलग ही प्रकार की आधुनिक गीतिकाव्य रचना है। आचार्य ब्रजमोहन चतुर्वेदी ने सम्भवतः इसी बात को ध्यान में रखकर इसे एक "विलक्षण गीतिकाव्य" कहा है।[१०]

'अहं राष्ट्री' के भाषा शिल्प और शैली के बारे में कुछ विद्वानों ने परम्परागत शब्दावली का प्रयोग करते हुए किसी ने इसे 'पांचाली शैली' की रचना और किसी ने इसे 'वैदर्भी शैली' की रचना कहा है। 'अभिराज' राजेन्द्र मिश्र ने "**अगौडी गौडानां सरसमधुरासौ शिखरिणी**" कह कर इसे एक अनुपम गीति रचना बताया है। यह तो रही काव्यशास्त्रियों और कवियों की बात। दूसरी ओर 'अहं राष्ट्री' के सामान्य पाठकों की दृष्टि से भी सोचा जाये तो यह कहने में कहीं कोई संकोच नहीं है कि काव्य भाषा की ऐसी सरलता और थिरकन सहज सुलभ नहीं होती है। भावों का सरल वृत्ति से सहज सम्प्रेषण कर देने वाली भाषा शैली व्योमशेखर के इस गीतिकाव्य की है।

'अहं राष्ट्री' के कवि ने अपने शिल्प कौशल से भाषा की रूढ़ि और जड़ता को भी तोड़ा है। कथ्य की नवीनता ने नये शब्द शिल्प को जन्म दिया है। शिल्प की यह नवीनता ताजमहल का वर्णन करने वाली गीतिका में देखें। इस गीतिका में ताजमहल को प्रेम की पवित्र प्रभा, प्यार में डूबे मन का उच्छ्वास, सफेद संगमरमर की शय्या में सो रहा कोई स्वप्न, पिंघला हुआ प्रस्तर, प्रेमपादप का चांदनी सा फूल तथा सुधा की धारा की बौछार के रूप में वर्णित किया गया है। यह बिम्ब शिल्प रचनाकार की ताजमहल से जुड़ी निजी संवेदनाओं से जन्मा ही कहा जा सकता है, रूढ़िगत कदापि नहीं।[१२] शिल्प की ऐसी ही नवीनता कविकुलगुरु कालिदास का वर्णन करने वाली गीतिका में मिलती है। व्योमशेखर ने इस गीतिका में कविकुल गुरु को कविता का कुमार अर्थ, वसन्त का विहग, सरसिज का अनघ रूप, आंसू बहाता कोई प्राण, हृदय का तरल भाव, और पृथिवी का मान, वर्णित किया है। सभी दृष्टि से यह एक नया भाषा शिल्प है जो एक ही गीतिका

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

में कालिदास के सम्पूर्ण कविव्यक्तित्व को और उसके काव्यार्थ के सौन्दर्य को समा लेता है।[१३]

साहित्य और संस्कृति के प्राचीन तत्त्वों को नये काव्य शिल्प में उतार कर भाषा और कथ्य के बासीपन को कैसे तोड़ा जाता है। यह शिल्प कौशल व्योमशेखर की 'अहं राष्ट्री' से पहचाना जा सकता है। इस प्रसंग में हम 'अहं राष्ट्री' की प्रथम गीतिका में प्रयोग किये गये 'गायत्री' और 'अमर्त्य' शब्दों के प्रयोग को ही देखें।[१४] लोकप्रसिद्ध गायत्रीमन्त्र और देवता जैसे रूढ अर्थों की भूमिका से भिन्न भूमिका में कवि ने इन शब्दों को उतार दिया है। यही कारण है कि यहां 'गायत्री' ने उद्गान कर रही राष्ट्री शक्ति का अर्थ और 'अमर्त्य' ने मृत्युभय से मुक्त वीरों का अर्थ ग्रहण कर लिया है।

व्योमशेखर के गीति शिल्प का एक अतिरिक्त सौन्दर्य उनकी काव्य भाषा की गतिशीलता है। इस भाषा में लोच है और स्फूर्ति है, ठहराव या गतिरोध नहीं है। जो कथन कवि की राष्ट्री का है, वह कथन उनकी गीति भाषा का भी माना जा सकता है—न सीमा-सीमान्तो भवति मम मार्गे व्यतिकरः।[१५] भाषा के गतिरोध या ठहराव को दूर करने के लिये व्योमशेखर की लेखनी काव्य भाषा के व्याकरण को अच्छी तरह पहचानती है। छायाकार वृक्षों से भरे यमुना के किनारों को 'तरुतटी'[१६] पपीहे के पी-पी गीत को 'तृषागीत'[१७] जैसे—अनेक शब्द शिल्प भाषा के सामान्य व्याकरण से बाधित नहीं होते वे उसे अपना अनुगमन करने के लिये बाध्य करते है।

'अहं राष्ट्री' का बिम्ब सौन्दर्य इन्द्रियों को परम तृप्ति प्रदान करने वाला है। कवि ने प्रचीन साहित्य और संस्कृति से प्राप्त तत्त्वों को नये बिम्बों में ढाल कर नया सौन्दर्य प्रदान किया है। इस गीतिकाव्य में रामायण की सीता को कहीं "निषाद के तीखे बाण से मर्माहत बाल्मीकि की करुण कविता", कहीं "भारतभूमि के हृदय रस से सिक्त कमलिनी", कहीं "राष्ट्रश्री" कहा गया है, महाभारत के भीष्म को कहीं "वरेण्य विद्यार्थ", कहीं "मृत्युंजय सेनानी" और कहीं सम्पूर्ण भारत राष्ट्र का श्रद्धेय "राष्ट्रात्मा" जैसी शैली से वर्णित किया गया है। यह शैली नितान्त अभिनव शिल्प की है। ऐसा ही गीति शिल्प दुर्गासप्तशती की गाथा को नयी अर्थवत्ता देने के लिये अपनाया

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

गया है। रात की चांदनी यहां उद्योगों में रातों रात जागकर काम करने वाले मजदूर की सहचरी बनकर उतर आयी है—निशाज्योत्स्ना कापि श्रमिकतनुरेखा सहचरी।[१८] शिल्प का ऐसा ही सौन्दर्य हम हलधर किसान और कृषकवधू के भावचित्रों में पाते हैं।[१९] हरिद्वार की गंगा की गोद में हम "निशाहंस" चन्द्रमा और "दिनमणि" सूर्य के मनोज्ञ बिम्बों का विलास देखते हैं ।

"अहं राष्ट्री" की गीतियों के लिये कवि ने शिखरिणी छन्द का वरण किया है जो कलकल करती सरिता जैसा प्रवाह रखता है और कवि की अपनी दृष्टि में "तरलहृदया सिन्धुलहरी" सा गतिशील है।[२०] यह छन्द अपनी गेयता के साथ-साथ इस गीतिकाव्य की उदात्त अनुभूतियों के सर्वथा अनुरूप है।

'अहं राष्ट्री' का संवेदनालोक

'अहं राष्ट्री' का संवेदन पक्ष अत्यन्त व्यापक है। यह भारत की अस्मिता का उद्गान है, उसकी राष्ट्री आत्मा का विभूतिगान है। राष्ट्रीय जीवन के जिस जिस ऊर्जस्वी और सौन्दर्य सम्पन्न चित्र ने रचनाकार की आत्मा को छुआ है, जिसमें राष्ट्र की अस्मिता, राष्ट्र के प्राकृतिक सौन्दर्य, राष्ट्र के साहित्य और संस्कृति का गौरव, वर्तमान युग की प्रगति की दिशा में उसके आत्म विश्वास की अनुभूति गीतिकार ने की है, उन सभी के भावस्पर्शी चित्र 'अहं राष्ट्री' के संवेदना पटल पर सजीव रूप में उतर आये हैं।

राष्ट्रबोध छिछले नारों का नाम नहीं है। यह संकीर्ण अर्थों में धर्म या मजहब भी नहीं है। यह वास्तव में एक भावना है, एक संस्कार है, यह एक संस्कृति है। यह ऐसे जनगण की संस्कृति है जिसके जीवन-मरण का संबंध उस धरती से जुड़ा है, जो समान रूप से उसकी जननी है यह एक ऐसी संस्कृति है जो राष्ट्रजन के बीच भाषा, धर्म और क्षेत्र आदि के ऊपरी भेद होने पर भी साहित्य, संगीत, कला और इतिहास की विरासत में सबकी समान साझेदारी बनाती है। 'अहं राष्ट्री' का यही मूल स्वर है—न धर्माणां भेदो नहि मम मता प्रान्तपरता, न सीमा सीमान्तो भवति मम मार्गे व्यतिकरः।[२२]

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भारतमाता की राष्ट्रीय धारणा के ऐतिहासिक विकास को रचनाकार ने बड़ी ही कुशलता से तीन चार गीतिकाओं में प्रस्तुत कर दिया है। भाषा, धरती और एक अस्थाभरा संस्कार, इन सबसे मिलकर भारतमाता का मूर्त्त व्यक्तित्व बना दिया है।[२३]

आसमुद्र–आहिमालय, प्रकृति ने भारत को एक राष्ट्र होने का संस्कार दिया है। यहां की नदियां राष्ट्रीय एकता की स्रोतस्विनी हैं। 'अहं राष्ट्री' की संवेदनाएं यही अभिव्यक्ति करती हैं–ममापामासेवो भरतभुवि भक्तिं जनयति।[२४]

भारत की संस्कृति का मूल संस्कृत भारती है। अन्य भाषाएं बाहरी रूप भेद होने पर भी उससे ही राष्ट्रीय संस्कार ग्रहण करती हैं। राष्ट्र की अपनी भाषाओं का तिरस्कार करके यदि कोई विदेशी भाषा उनके सिर पर थोप दी जाती है तो इससे राष्ट्र के स्वाभिमान का पराभव होता है। 'अहं राष्ट्री' की संवेदनाएं इसी रूप में मुखरित हुई हैं–भृशं दूये चित्ते बत मम गृहे मे परिभवः।[२५]

रामायण और महाभारत तथा उनका अनुगमन करने वाला भारतीय भाषाओं का विपुल साहित्य सम्पूर्ण भारतीय जन की विरासत है, यही 'अहं राष्ट्री' का संदेश है।

राष्ट्र का नव निर्माण शब्दों की डींग मारने से नहीं होता, यह निर्माण मेहनतकश किसान और मजदूर करते हैं, जिसकी रक्षा देश के वीर सैनिक करते हैं। 'अहं राष्ट्री' के कवि की संवेदनाओं में इन सभी शक्तियों के यथार्थ चित्र उतर आये हैं। उसके किसान निद्राजयी "गुडाकेश" हैं, उनकी रातें "सदासूर्या रहती है,[२६] सीमान्तों के रक्षक वीर सैनिक "हिम की गोद में अग्नि बन कर रहते हैं और घोर गर्मी की आग में वे "हिममणि" बने रहते हैं,[२७] वर्षा और घाम सभी को साहस से जीत लेते हैं। देश के ज्ञानी विज्ञानी जन की महिमा से ही भारत विश्व का गुरु माना गया है। उसका वह महान "रिक्थ" अभी भी नष्ट नहीं हुआ है।[२८]

किसी भी काव्य कृति के भावसंसार और शिल्प सौन्दर्य को किसी एक आलेख में समेट लेना संभव नहीं होता है। उससे जुड़ने का केवल एक

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

समीक्षात्मक प्रयत्न भर हो पाता है। ऐसा ही एक प्रयत्न व्योमशेखर की 'अहं राष्ट्री' के शिल्प और संवेदन को लेकर इस आलेख में किया गया है। इस गीतिकाव्य की सरलता और सहजता ही इसका सबसे बड़ा सौन्दर्य है। राष्ट्री भारती के मुख से इस गीतिकाव्य में यह कथन किया गया है—न दुष्टः शब्दो मे भवति न तदर्थश्छलकरः।[२९] हम समझते हैं कि यह कथन व्योमशेखर की 'अहं राष्ट्री' के बारे में भी उसी अर्थ में चरितार्थ समझा जा सकता है।

संदर्भ :

१. जयकिशन खंडेलवाल, संस्कृत साहित्य की प्रवृत्तियां, पृ० १ से ९

२. आचार्य बलदेव उपाध्याय, संस्कृत साहित्य का इतिहास पृ० ३२३

३. वही, पृ० ३२५

४. देववाणी प्रकाशनम् नई दिल्ली-११००५९ से प्रकाशित "देववाणी सुवासः" (द्वितीय खंड) में डा० दुर्गा प्रसाद मिश्र और डा० संध्या शर्मा के लेख पृ० ५.१३६, ५.१४७

५. गीता चन्सौरिया, अभिराज राजेन्द्र मिश्र की काव्यसाधना, वही पृ० ५.५५४

६. वही

७. इस दिशा में अखिल भारतीय संस्कृत परिषद् लखनऊ की 'ऋतम्' और 'अजस्रा' तथा देववाणी- परिषद्, दिल्ली की 'अर्वाचीनसंस्कृतम्' का उल्लेखनीय योगदान है।

८. ऋग्वेद १०.१२५, ३ ९. निरुक्त १०. अहं राष्ट्री, पृ० ५

११. वही १२. वही पृ० २८ १३. वही पृ० २८

१४. वही पृ० १० १५. वही पृ०१४ १६. वही पृ० २०

१७. वही पृ० २८ १८. वही पृ० ७४ १९. वही पृ० ७०

२०. वही पृ० २४ २१. वही पृ०२४ २२. वही पृ० १४

२३. वही पृ० १६, १७ २४. वही पृ० ३० २५. वही पृ० ४०

२६. वही पृ० ६८ २७. वही पृ० ७६ २८. वही पृ० ६६

२९. वही पृ० ४२

Kirtikant Sharma Collection, Najafgarh

१६२. उज्जयिनीमुपसर (डा० सुधाकराचार्य त्रिपाठी) १०/२, १५ अप्रैल, १९८८

१६३. स्वप्नकन्यका (श्री ई० पी० भरतपिषारटिः) १०/२, १५ अप्रैल, १९८८

१६४. पल्लव कम्पसे किम् ? (आचार्य वेदानन्द झा) १०/२, १५ अप्रैल, १९८८

१६५. श्रीवेदव्यासप्रणीतब्रह्मसूत्रस्य सरलश्लोकेषु विवृतिः (आचार्य रमेशचन्द्र शुक्लः) १०/३, १५ अप्रैल, १९८८

१६६. देववाणीहुंकारशतकम् (१०२ पद्यात्मकम्) (अभिराज डा० राजेन्द्र मिश्रः) १०/२, १५ जुलाई, १९८८

१६७. दयानन्दसूक्तिसप्तशती (७१९ पद्यात्मकं सूक्तिकाव्यम्) (श्रीशिवकुमार मिश्रः) १०/३, १५ जुलाई, १९८८

१६८. स्वागतं पयोद ते ! (डा० रमाकान्त शुक्लः) १०/३, १५ जुलाई, १९८८

१६९. गीतमन्दाकिनी (डा० इच्छाराम द्विवेदी) १०/४, १५ अक्टूबर, १९८८

१७०. यवद्वीपसाहित्यशतकम् (१०२ पद्यात्मकम्)('अभिराज' डा० राजेन्द्र मिश्रः) १०/४, १५ अक्टूबर, १९८८

१७१. गान्धिसूक्तिसप्तशती (७०२ पद्यात्मकम् सूक्तिकाव्यम्) (श्रीशिवकुमार मिश्रः) १०/४, १५ अक्टूबर, १९८८

१७२. भवतु प्रभातः (श्री मधुर शास्त्री) १०/४, १५ अक्टूबर १९८८

१७३. तत्स्मितम् ! (डा० दयानन्द भार्गवः) १०/४, १५ अक्टूबर, १९८८

१७४. श्रीनेहरूवृत्तम् (११४ पद्यात्मकं काव्यम्) (डा० रमेशचन्द्र शुक्लः) ११/१, १५ जनवरी, १९८९

१७५. भाव्यं शुभं भावि हि भारतस्य (श्री श्रीसुन्दरराजः) ११/१, १५ जनवरी, १९८९

१७६. नेहरुं तं स्मरामः (डा० रमाकान्त शुक्लः) ११/१, १५ जनवरी, १९८९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१७७. दूतप्रतिवचनम् (१-३२ मन्दाक्रान्तापद्यानि सहिन्द्यनुवादानि) (डा० इच्छाराम द्विवेदी) ११/१, १५ जनवरी, १९८९
१७८. वसन्त-सौरभम् (डा० केदार नारायण जोशी) ११/१, १५ जनवरी, १९८९
१७९. बालीप्रत्यभिज्ञानसार्धशतकम् (१५१ पद्यात्मकम्) ('अभिराज' डा० राजेन्द्र मिश्रः) ११/२, १५ अप्रैल, १९८९
१८०. दूतप्रतिवचनम् (३३-६२ पद्यानि) (डा० इच्छाराम द्विवेदी) ११/२, १५ अप्रैल, १९८९
१८१. ब्रूते सत्यं शिवं सुन्दरम् (डा० परमानन्द शास्त्री) ११/२, १५ अप्रैल, १९८९
१८२. राष्ट्रैक्यगीतम् (डा० नलिनी शुक्ला) ११/२, १५ अप्रैल, १९८९
१८३. व्यवहार-गीता (डा० रामेश्वरदत्त शर्मा) ११/२, १५ अप्रैल, १९८९
१८४. सङ्कीतर्नसुधाषोडशी (डा०विन्ध्येश्वरीप्रसादमिश्रः 'विनयः') ११/२, १५ अप्रैल, १९८९
१८५. एकं सद् बहुधा विलोक्यते भारतम् (डा०रमाकान्त शुक्लः) ११/२, १५ अप्रैल, १९८९
१८६. विक्रमोर्वशीयस्य ध्वनिनाट्यरूपान्तरम् (डा० रमाकान्त शुक्लः) ११/३, १५ जुलाई, १९८९
१८७. आलोकिनी (ध्वनिनाटकम्) (डा० रमाकान्त शुक्लः) ११/३, १५ जुलाई, १९८९
१८८. अद्यत्वे (डा० विष्णकान्त शुक्लः) ११/४, १५ अक्टूबर, १९८९
१८९. दाराशिकोहीयम् (ध्वनिनाटकम्) (डा० रमाकान्त शुक्लः) ११/४, १५ अक्टूबर, १९८९
१९०. उत्तरमङ्गलम् (डा० रमाकान्त शुक्लः) १२/१, १५ जनवरी, १९९०
१९१. भारतं नाम विश्रुतम् (श्री श्रीसुन्दरराजः) १२/१, १५ जनवरी, १९९०
१९२. निर्वाचनावसरे (प्रो० बटुकनाथ शास्त्री खिस्ते') १२/१, १५ जनवरी, १९९०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

१९३. निर्वाचनात्प्राक् (डा० भास्कराचार्य त्रिपाठी) १२/१, १५ जनवरी, १९९०
१९४. केचन प्रश्नाः (डा० कपिलदेव पाण्डेयः) १२/१, १५ जनवरी, १९९०
१९५. सन्ध्यामाह विधुः (डा० परमानन्द शास्त्री) १२/१, १५ जनवरी, १९९०
१९६. मदीयं मनो मोदते संस्कृतेन (डा० चन्दनलाल पाराशरः) १२/१, १५ जनवरी, १९९०
१९७. तुभ्यं नमः (डा० शम्भुनाथ आचार्यः) १२/१, १५ जनवरी, १९९०
१९८. दूरदर्शने प्रस्तुतं 'भाति मे भारतम्' (डा० रमाकान्त शुक्लः) १२/१, १५ जनवरी, १९९०
१९९. उड्डीयते विमानम् (डा०हरिदत्त शर्मा) १२/२, १५ अप्रैल, १९९०
२००. वसन्त-गीतम् (डा० कृष्णमुरारिः शर्मा) १२/२, १५ अप्रैल, १९९०
२०१. वसन्त-गीतिः (डा०विन्ध्येश्वरीप्रसादमिश्रः 'विनयः') १२/२, १५ अप्रैल, १९९०
२०२. मातुः स्तवकः (डा० बच्चूलाल अवस्थी 'ज्ञानम्') १२/२, १५ अप्रैल, १९९०
२०३. जाबालिपुरं चल! (डा० रमाकान्त शुक्लः) १२/२, १५ अप्रैल, १९९०
२०४. परिहास-प्रहेलिकाः (डा०सुधीकान्त भारद्वाजः) १२/२, १५ अप्रैल, १९९०
२०५. यतो यतोऽपि गम्यते (डा०. भगवतीलाल राजपुरोहितः) १२/२, १५ अप्रैल, १९९०
२०६. धारणा (चेतोदार्शनिकी कथा) (डा० प्रकाश पाण्डे) १२/२, १५ अप्रैल, १९९०
२०७. आन्दोलनम् (कथा) (डा० इच्छाराम द्विवेदी) १२/२, १५ अप्रैल, १९९०
२०८. जापानदेशीयानि 'तान्का' काव्यानि (डा० हर्षदेव 'माधवः') १२/२, १५ अप्रैल, १९९०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२०९. 'सौरि सरे'ति महावाक्यम् (डा० रामेश्वरदत्त शर्मा) १२/२, १५ अप्रैल, १९९०
२१०. मावमंस्थाः सखे ! (डा० परड्डी मल्लिकार्जुनः) १२/२, १५ अप्रैल, १९९०
२११. असंख्यातवर्षाणि जीवनम् (डा० परमानन्द शास्त्री) १२/२, १५ अप्रैल, १९९०
२१२. प्रिया (डा० हर्षदेव 'माधवः') १२/३, १५ जुलाई, १९९०
२१३. मेघदूतः (डा० ताराशंकर शर्मा) १२/३, १५ जुलाई, १९९०
२१४. तिस्त्रो रचनाः (१. वर्षन्त्यनलं यदि मित्रकराः, २. गज़लिका, ३. सत्यं बन्दीकृतं कन्दरे) (डा०परमानन्द शास्त्री) १२/३, १५ जुलाई, १९९०
२१५. श्रीलाललालित्यम् (श्री बटोही झा) १२/३, १५ जुलाई, १९९०
२१६. मित्रदूतम् (१०९पद्यात्मकं दूतकाव्यम्)(डा० इच्छाराम द्विवेदी 'प्रणवः') १२/३, १५ जुलाई, १९९०
२१७. वदत नेतारो मनाक् ! (डा० रमाकान्त शुक्लः) १२/४, ७ नवम्बर, १९९०
२१८. नेतृकथा (डा० भगवतीलाल राजपुरोहितः) १२/४, ७ नवम्बर, १९९०
२१९. नेतृशतनामावलिः (डा० इच्छाराम द्विवेदी) १२/४, ७ नवम्बर, १९९०
२२०. ग्रीष्म-सौरभम् (डा० केदारनारायण जोशी) १२/४, ७ नवम्बर, १९९०
२२१. वर्षा-श्रीः (डा० केदारनारायण जोशी) १२/४, ७ नवम्बर, १९९०
२२२. ययातिशर्मिष्ठीयम् (एकाङ्करूपकम्) (डा० रामकिशोर मिश्रः) १२/४, ७ नवम्बर, १९९०
२२३. व्रजदर्शनम् (श्री बटोही झा) १२/४, ७ नवम्बर, १९९०
२२४. अपण्डितोऽहम् (श्री प्रभाचार्यः पं० पी०बी०आचार्यः) १२/४, ७ नवम्बर, १९९०
२२५. आह्वानम् (श्री प्रभाचार्यः) १२/४, ७ नवम्बर, १९९०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२२६. धन्या धरायां कलमालिनीयम् (डा० कैलाशनाथ द्विवेदी) १२/४, ७ नवम्बर १९९०
२२७. संस्कृतज्ञा मृताः सन्ति, न मृतं संस्कृतं तथा (डा० रामेश्वरदत्त शर्मा) १२/४, ७ नवम्बर, १९९०
२२८. सत्यभक्त-दोहावली (श्री शान्तप्रकाशः सत्यदासः) १२/४, ७ नवम्बर, १९९०
२२९. अभिनवमोहमुद्गरम् (श्री॰सुन्दरराजन्) १२/४, ७ नवम्बर, १९९०
२३०. रक्ष्यतां सर्वथेदं सदा सदा संस्कृतम् (आचार्य वीरेन्द्रकुमार झा) १३/१, १५, जनवरी, १९९१
२३१. दुस्समयः (श्री प्रताप वन्द्योपाध्यायः) १३/१, १५, जनवरी, १९९१
२३२. शाकुन्तलीयम् (डा० कैलाशनाथ द्विवेदी) १३/१, १५, जनवरी, १९९१
२३३. चाटुल-पञ्चदशी (डा० दादूराम शर्मा) १३/१, १५, जनवरी, १९९१
२३४. उत्कोचाष्टकम् (डा० दादूराम शर्मा) १३/१, १५, जनवरी, १९९१
२३५. पश्य बन्धो ! क्षणम् (डा० इच्छाराम द्विवेदी 'प्रणवः') १३/२, १५, जनवरी, १९९१
२३६. भारतेऽनारतं किं नु बोभूयते (डा० रामप्रकाश वर्णी) १३/२, १५, जनवरी, १९९१
२३७. संगच्छध्वं संगच्छध्वं (कविरत्न ओमप्रकाश ठाकुरः) १३/२, १५ अप्रैल, १९९१
२३८. दीपावली-शुभेच्छाः (डा० उमाकान्त शुक्लः) १३/२, १५ अप्रैल, १९९१
२३९. पद्यप्रसूनस्तबकः (पं० शैलेन्द्रनाथ पाठकः) १३/२, १५ अप्रैल, १९९१
२४०. मुक्तकद्वयी (डा० शम्भुनाथ आचार्यः) १३/२, १५ अप्रैल, १९९१
२४१. गलज्जलिका ('अभिराज' डा० राजेन्द्रमिश्रः) १३/२, १५ अप्रैल, १९९१

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२४२. साधु जानेऽहम् ('अभिराज' डा० राजेन्द्र मिश्रः) १३/२, १५ अप्रैल, १९९१
२४३. नवसंवत्सरवर्धापनम् (डा० अमियचन्द्र शास्त्री) १३/२, १५ अप्रैल, १९९१
२४४. वन्दे महापुरुष ! ते चरणारविन्दम् (अभिराज राजेन्द्र मिश्रः) १३/२, १५ अप्रैल, १९९१
२४५. सिद्धरामेश्वरम् (डा० प्रकाश पाण्डे) १३/२, १५ अप्रैल, १९९१
२४६. किं जीवनं ते ! (डा० रमाकान्त शुक्लः) १३/२, १५ अप्रैल, १९९१
२४७. ब्रूहि जगन्नाथस्वामिन् ! (डा० रमाकान्त शुक्लः) १३/३, १५ जुलाई, १९९१
२४८. अशनिपातः (डा० कृष्णकान्त शुक्लः) १३/३, १५ जुलाई, १९९१
२४९. राजीवहत्या (डा० प्रकाश पाण्डे) १३/३, १५ जुलाई, १९९१
२५०. भारती-परिदेवनम् (डा०राजेन्द्र मिश्रः 'अभिराजः)१३/३, १५ जुलाई, १९९१
२५१. वृत्तपत्रम् (डा० सत्यव्रत शास्त्री) १३/३, १५ जुलाई, १९९१
२५२. कालिदासः शिरोमणिः (प्रो०ताराशंकर शर्मा)१३/३, १५ जुलाई, १९९१
२५३. दोहा-दशकम् (डा० परमानन्द शास्त्री) १३/३, १५ जुलाई, १९९१
२५४. दाडिममेकं शतं रोगिणः (डा० परमानन्द शास्त्री)१३/३, १५ जुलाई, १९९१
२५५. मानवता (डा० जीतसिंह खोखरः) १३/३, १५ जुलाई, १९९१
२५६. धन्वन्तरिं तमीडे (डा० रमाकान्त शुक्लः) १३/४, १५ अक्टूबर, १९९१
२५७. श्रीहनूमत्पञ्चाशत् (श्री०सुन्दरराजः) १३/४, १५ अक्टूबर, १९९१
२५८. शरणागति-षोडशी (श्री०सुन्दरराजः) १३/४, १५ अक्टूबर, १९९१
२५९. अकालमृत्युः (डा० इला घोष) १३/४, १५ अक्टूबर, १९९१

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२६०. क्षणिका: (आचार्य गणपति शुक्ल:) १३/४, १५ अक्टूबर, १९९१

२६१. राजनीतिलीलाशताधिकम् (डा० दीपक घोष:) १४/१, ३० जनवरी, १९९२

२६२. कालिदासमहोत्सवम् (डा० राजेन्द्र मिश्र 'अभिराज:')१४/१, ३० जनवरी, १९९२

२६३. शीत: (डा०शिवदत्त शर्मा चतुर्वेदी) १४/१, ३० जनवरी, १९९२

२६४. दूरदर्शने प्रस्तुतं भाति मे भारतम् (११-२०) (डा० रमाकान्त शुक्ल:)१४/१, ३० जनवरी, १९९२

२६५. श्रीठाकुरगीतावली (कविरत्नम् ओमप्रकाश ठाकुर:) १५/२, १५ अप्रैल, १९९२)

अत्र श्री ठाकुरस्येमाश्चत्वारिंशद् गेयरचना: संकलिता:-१. वागीश्वरी विजयते, २. आत्मनिवेदनम्, ३. शकुन्तलाया: प्रश्न:, ४. तमसो मा ज्योतिर्गमय, ५. दीपशिखा, ६. नववर्षाभिनन्दनम्, ७. राष्ट्रदेवार्चना, ८. अन्तर्वेदना, ९. आलोकं भूमाववतारय, १०. इयं वाटिका मे, ११. वसुधा भातु हरितपरिधाना, १२. विजयतां मे प्रियो देश:, १३. धरागीतम्, १४. तेभ्य: स्तान्मे मधुरं गीतम्, १५. प्रकृति: करोत्यभिनन्दनम्, १६. वर्षावर्णनम्, १७. वन्यैर्जीवैर्धरा विभाति, १८. तत्प्रतीक्षेऽहं प्रभातम्, १९. श्रमो विजयते, २०. किं नो भजेथा:, २१. प्रबोधिनी, २२. तज्जीवनमभिरामम्, २३. जागृयाम, २४. अलं नैराश्यकथया, २५. श्रमो महीयान्, २६. य: प्रिय: प्रिय: एव स:, २७. मुद्राया: शृणु महिमानम् , २८. आजीविका, २९. पुण्या व्रजभूमि:, ३०. दिल्ली, ३१. महानगरजीवनम्, ३२. मा भज मौनम्, ३३. भारतेऽधिराजताम्, ३४. प्रदीपो विभाति, ३५. युगपुरुषो गान्धी, ३६. संगच्छध्वं संगच्छध्वं, ३७. गेहं प्रत्यानयते, ३८. वित्ते विनिवेशय चित्तम्, ३९. यामि कमधुना शरणम्, ४०. वितरामो मोदं जने जने ।

२६६. चक्रानुसरणम् (ध्वनिनाटकम्) (डा०रमाकान्त शुक्ल:) १४/३, १५.८.१९९२

२६७. शरदृतुवर्णनम्(प्रा० एच०ए० शाण्डिल्य:) १४/३, १५.८.१९९२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२६८. विग्नदेईमन् (डा० प्रकाश पाण्डे) १४/३, १५.८.१९९२
२६९. दर्दुरशाला (डा० भास्कराचार्य त्रिपाठी) १४/३, १५.८.१९९२
२७०. संस्कृतशतकम् (डा० राजेन्द्र मिश्र 'अभिराजः') १४/४, ७.११.१९९२
२७१. कथञ्चिदस्तु भारते स्वतन्त्रता सुरक्षिता (श्री०सुन्दरराजन्) १४/४, ७.११.१९९२
२७२. एकदा (डा० परमानन्दशास्त्री) १४/४, ७.११.१९९२
२७३. पं० हृदयनाथमिश्रकृता श्रीसूर्यस्तुतिः (प्रस्तोता–डा० उदयनाथ झा अशोकः') १४/४, ७.११.१९९२
२७४. दीपपर्व (डा०पतञ्जलिकुमार भाटिया) १४/४, ७.११.१९९२
२७५. सञ्जीभूता सिन्धोर्बाला (डा० ताराशंकर शर्मा) १४/४, ७.११.१९९२
२७६. दीपमालिकोत्सवे वर्धापनम् (डा० अमियचन्द्र शास्त्री' सुधेन्दुः') १४/४, ७.११.१९९२
२७७. हृदयपरिवर्तनम् (डा०बच्चूलाल अवस्थी) १४/४, ७.११.१९९२
२७८. प्रबन्धः (डा० अरविन्दमोहनः) १४/४, ७.११.१९९२
२७९. बाउलकाव्यम् (डा० हर्षदेव माधवः) १४/४, ७.११.१९९२
२८०. नाम शिवः परमस्मि शवः (डा० शिवशरण शर्मा द्विवेदी) १४/४, ७.११.१९९२
२८१. का गतिः (डा० भगवतीलाल राजपुरोहितः) १४/४, ७.११.१९९२
२८२. कज्जलिका (आचार्य कामताप्रसाद त्रिपाठी 'पीयूषः') १४/४, ७.११.१९९२
२८३. तव तपस्यायाम् (श्री रवीन्द्र कुमार पण्डा) १४/४, ७.११.१९९२
२८४. दीपमाला २०४८ शुभकामना (डा० उमाकान्त शुक्लः) १४/४, ७.११.१९९२
२८५. पल्लव रे ! (डा० प्रकाश पाण्डे) १४/४, ७.११.१९९२
२८६. शुभकामनाः (डा० भास्कराचार्य त्रिपाठी, डा० उमारमण झा, डा० चन्द्रदीप शुक्लः डा० जनार्दनप्रसाद पाण्डेयः 'मणिः') १५/१, २६ जनवरी, १९९३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

२८७. नूतने वत्सरे (आचार्य वीरेन्द्रकुमार झा), १५/१, २६ जनवरी, १९९३
२८८. वन्दनीयास्ते ! (डा० रमाकान्त शुक्लः), १५/१, २६ जनवरी, १९९३
२८९. भारतं भारतीयात्मनां भारतम् (डा० वनेश्वर पाठकः), १५/१, २६ जनवरी, १९९३
२९०. तव स्मृतिः (डॉ० राजेन्द्र नानावटी), १५/१, २६ जनवरी, १९९३
२९१. रामनाम्नि मारणं कथं जनप्रतारणम् (श्री श्री० सुन्दरराजः), १५/१, २६ जनवरी, १९९३
२९२. विन्ध्याचलदण्डकम् (डॉ० राधावल्लभ त्रिपाठी), २६ जनवरी, १९९३
२९३. भारतं रे ! (डॉ० जनार्दन प्रसाद पाण्डेयः 'मणिः'), २६ जनवरी, १९९३
२९४. स्वप्नप्रबोधः (मूलकविः डॉ० कमलेशदत्त त्रिपाठी), २६ जनवरी, १९९३
२९५. स्वप्न प्रबोधः (हिन्दी रूपान्तरकार डॉ० रमाकान्त शुक्लः), २६ जनवरी, १९९३
२९६. सहधर्मिता (प्रो० देवदत्त भट्टिः)१५/१, २६ जनवरी, १९९३
२९७. हे कृष्ण ! पाह्यामयात् (पं० टी० वि० परमेश्वर अय्यरः) १५/१, २६ जनवरी, १९९३
२९८. कवि-संवादः (श्री बी०एस० करुणाकरः)१५/१, २६ जनवरी, १९९३
२९९. राजनीतिलीलाशताधिकम् (परिशिष्टम्) (डा० दीपक घोषः) १५/१, २६ जनवरी, १९९३
३००. कृष्णाश्वधाटी (त्रिपाठी डॉ० भास्कराचार्यः) १५/२, २६ अप्रैल, १९९३
३०१. न देवभारती मृता न भास्करस्तिरोहितः (डा० रहसविहारी द्विवेदी) १५/२, १५ अप्रैल, १९९३
३०२. शिव शिव शिवे (श्री शुकदेव मुनिः) १५/२, १५ अप्रैल, १९९३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३०३. संस्कृतपत्रकारान् प्रति (डा०सत्यव्रत शास्त्री) १५/४, १५ अक्टूबर, १९९३

३०४. देशगीतिका (डॉ० हरेकृष्ण मेहेरः) १५/४, १५ अक्टूबर, १९९३

३०५. वासन्ती शून्यता (डॉ० जयश्रीः चट्टोपाध्यायः) १५/४, १५ अक्टूबर, १९९३

३०६. अपहरणम् (डा०रविन्द्रकुमार पण्डा) १५/४, १५ अक्टूबर, १९९३

३०७. कर्दमक्लिन्ना धरा (डा०इच्छाराम द्विवेदी 'प्रणवः') १५/४, १५ अक्टूबर, १९९३

३०८. संवाद-कथा (शान्तप्रकाशः सत्यदासः) १५/४, १५ अक्टूबर, १९९३

३०९. तैत्तिरीयम् (डा० के० महेश्वरन् नायरुः) १५/४, १५ अक्टूबर, १९९३

३१०. वैशालीशतकम् ('अभिराज' राजेन्द्र मिश्रः) १५/४, १५ अक्टूबर, १९९३

३११. कात्यायनीस्तवः ('कविरत्न' श्रीकृष्ण सेमवालः) १५/४, १५ अक्टूबर, १९९३

३१२. सत्प्रेरणानाटकम् (डॉ० इच्छाराम द्विवेदी 'प्रणवः'), १६/१, २६ जनवरी, १९९४

३१३. मदीयकविते! कुरुष्व गानम् (डॉ० रमाकान्त शुक्लः) १६/१, २६ जनवरी, १९९४

३१४. शारदावन्दनम् (डा० रामकिशोर मिश्रः) १६/१, २६ जनवरी, १९९४

३१५. मारीशस-महिमा (डा० शिवशरणशर्मा द्विवेदी) १६/१, २६ जनवरी, १९९४

३१६. परमानन्दगुरून् प्रति (पं० भगवद्दत्त गौडः) १६/१, २६ जनवरी, १९९४

३१७. सत्प्रेरणानाटकम् (हिन्दी रूपान्तर) (डॉ० इच्छाराम द्विवेदी 'प्रणव'), १६/२, १५ अप्रैल, १९९४

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३१८. हजरतबलप्रकरणम् (प्रा० हरिश्चन्द्र रेणापुरकरः) १६/३, ३१ जुलाई, १९९४

३१९. वर्णभेदावसादः (प्रा० हरिश्चन्द्र रेणापुरकरः)१६/३, ३१ जुलाई, १९९४

३२०. धूमकेतो ! (डा० रामकरण शर्मा)१६/३, ३१ जुलाई, १९९४

३२१. रसिक ! त्वदर्थम् (मूलगीतकारः गंगाधर महाम्बरे) (मराठीगीतस्य संस्कृतवृत्तानुवादः–डा०पु०द० नवाथे) १६/३, ३१ जुलाई, १९९४

३२२. मा भव मूढस्त्वं भव विज्ञः (धीरेन्द्र कुमार झा) १६/३, ३१ जुलाई, १९९४

३२३. भारते राजतां भारती सर्वदा (धीरेन्द्र कुमार झा) १६/३, ३१ जुलाई, १९९४

३२४. राधानुनयः (डा० नलिनी शुक्ला) १६/४, १५ अक्टूबर, १९९४

३२५. सौवस्तिकशतकम् ('अभिराज' डा०राजेन्द्रमिश्रः) १६/४, १५ अक्टूबर, १९९४

३२६. समारब्धम् (डा० इच्छाराम द्विवेदी 'प्रणवः') १६/४, १५ अक्टूबर, १९९४

३२७. प्रमाणं किम् (डा० इच्छाराम द्विवेदी 'प्रणवः') १६/४, १५ अक्टूबर, १९९४

३२८. व्याख्या (डॉ० प्रकाश पाण्डे), १७/१, १५ फरवरी, १९९५

३२९. प्रेक्ष्यताम् (त्रिपाठी भास्कराचार्यः), १७/१, १५ फरवरी, १९९५

३३०. बृहन्नला (महाकाव्यखण्डः) (प्रणेता डॉ० हर्षदेव 'माधवः' १७/१, १५ फरवरी, १९९५

३३१. वयं सेवामहै राष्ट्रम्(अभिनव शुक्लः) १७/२, १५ मई, १९९५

३३२. भागीरथी-दर्शनम् (डा० बलभद्र प्रसाद गोस्वामी) १७/२, १५ मई, १९९५

३३३. गुजरात संस्कृतसाहित्य अकादमी मूर्धन्यविद्वत्सम्मानम् (डा० गौतम पटेलः अध्यक्षः गु. सं. अ.)१७/२, १५ मई, १९९५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३३४. **राजनीतिशतकम्** (डॉ० शिवदत्त चतुर्वेदी), १७/२, १५ मई, १९९५

३३५. **शिरो धुनोति भारतम्** (अभिनव शुक्लः) १७/३, ३१ अगस्त, १९९५

३३६. **निस्यन्दिनी** (१-२६) गीतीनां शीर्षकाणीत्थं सन्ति—१. दयसे न कथम्!!, २. अयि मानवीये चेतने!!, ३. व्यथावल्लरी!!, ४. जीवितं त्वदधीनम्!!, ५. भारतं रे!!, ६. जीवनधारा!!, ७. पीतो न मया चषकः!!, ८. भण रे कविते!!, ९. विरौत्येष देशः!!, १०. शृणु कल्पने!!, ११. मम जीवनम्!!, १२. भारतं नमाम्यहम्!!, १३. किं स्तौमि हरे!!, १४. व्यथते हृदयम्!!, १५. स्वागतम्!!, १६. वसन्तकाल आगतः!!, १७. स्वीयराष्ट्रं दृश्यताम्!!, १८. गरलमिह पीतं रे बन्धो!!, १९. प्रणमत्येष मणिः!!, २०. नेदमसत्यं त्वमसि हि सारम्!!, २१. प्रीतिरेषा!!, २२. वयं रक्षामः!!, २३. कथमिदं मन्ये!!, २४. वैचित्र्यम्!!, २५. कण्टकाऽभूषणम्!!, २६. त्वत्प्रणयसन्देशसरणिः!! (डा० जनार्दन प्रसाद पाण्डेय 'मणिः') १७/३, ३१ अगस्त, १९९५

३३७. **दुर्गाष्टकम्** (डा० मिताली देव) १७/४, १५ अक्टूबर, १९९५

३३८. **निस्यन्दिनी** (२७-५५) गीतीनां नामानि सन्ति—२७. भ्रमतीव वेदना किम्!!, २८. किमियं शरन्नवलभाभरिता!!, २९. राष्ट्रभक्ताः प्ररक्षत!!, ३०. सुस्मितिस्ते!!, ३१. संसृतिः क्षुब्धा दृश्यताम्!!, ३२. अद्भुतं जीवनम्!!, ३३. वेपते भारतम्!!, ३४. नैव जाने!!, ३५. संस्कृतभाषा!!, ३६. विलसति फाल्गुनमासोऽयम्!!, ३७. क्व यास्यसि!!, ३८. कथमिह भुवने!!, ३९. न कं क्रन्दयति!!, ४०. वञ्चितोऽहं त्वया!!, ४१. मम राष्ट्रमिदं जगदाभरणम्!!, ४२. सुपथं वद!!, ४३. भूतलेऽस्मिन्!!, ४४. रसयति जलदः!!, ४५. कथं मे शिवे!!, ४६. पीतपत्रम्!!, ४७. कालिदासो जयेत्!!, ४८. चिन्ते त्यज!!, ४९. संस्कृतं संवदामः!! ५०. राष्ट्रसंवेदनाः!!, ५१. मृदुस्मितिः पीता!!, ५२. काम्यं मदीयम्!!, ५३. का कथा!!, ५४. सुन्दरि भासि कुतः!!, ५५. भवतु काऽपि!! (डा० जनार्दन प्रसाद पाण्डेय 'मणिः') १७/४, १५ अक्टूबर, १९९५

३३९. **विष्णुकाव्यम्** (१३५७ पद्यात्मकम्)(श्री १०८ पं० सत्यदेव वासिष्ठः) १८/१-३, २७ मई, १९९६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३४०. सुगमरामायणम् (महाकाव्यम्) (१-६ सर्गाः) (डॉ० रमेशचन्द्र शुक्लः), १८/४, १५ अक्टूबर, १९९६

३४१. देशवर्णनम् (डॉ० देवनारायण झा) १९/१, १५ जनवरी, १९९७

३४२. वन्द्यतां कापि सा शासनासन्दिका ! (रमाकान्त शुक्लः) १९/१, १५ जनवरी, १९९७

३४३. मातः दुर्गे ! (डॉ० निरञ्जन दाशः) १९/१, १५ जनवरी, १९९७

३४४. सर्वे सन्ति मदीयाः (डॉ० शिवशरणशर्मा द्विवेदी) १९/१, १५ जनवरी, १९९७

३४५. नौकाः (डॉ० प्रकाश पाण्डे) १९/१, १५ जनवरी, १९९७

३४६. दशमविश्वसंस्कृतसम्मेलनसम्पूर्तौ (आचार्य श्रीनिवासरथः) १९/१, १५ जनवरी, १९९७

३४७. जार्जकार्डोनाः (डॉ० दीक्षितपुष्पा) १९/१, १५ जनवरी, १९९७

३४८. माता शिशुश्च (श्री सुन्दरराजः) १९/२-४, १५ अक्टूबर, १९९७

३४९. आशीर्वचनम् ('अभिराज' राजेन्द्रमिश्रः) १९/२-४, १५ अक्टूबर, १९९७

३५०. अर्वाचीनसंस्कृतकविमाला (डॉ सम्पटूरु रङ्गनाथः) १९/२-४, १५ अक्टूबर, १९९७

३५१. स्वतन्त्रतायाः स्वर्णजयन्ती (रमाकान्त शुक्लः) २०/१, २६ जनवरी, १९९८

३५२. भारतीयस्वातन्त्र्यस्य स्वर्णमहोत्सवे चिन्तनम् (डॉ० रामचन्द्र अरलीकट्टी) २०/१, २६ जनवरी, १९९८

३५३. जय त्रिवर्ण ध्वज (श्री सुन्दरराजः) २०/१, २६ जनवरी, १९९८

३५४. भाति संस्कृतभारती (शारदा के०) २०/१, २६ जनवरी, १९९८

३५५. विभाति भारती धरा (व्योमशेखरः) २०/१, २६ जनवरी, १९९८

३५६. सुसंस्कृतजीवनम् (डॉ० राधेकान्त दवे) २०/१, २६ जनवरी, १९९८

३५७. दुर्नीतिगत्यष्टम् (श्री तन्मयकुमार भट्टाचार्यः) २०/१, २६ जनवरी, १९९८

३५८. धनार्जन-शताब्दी (डॉ० शिवशरण शर्मा द्विवेदी) २०/१, २६ जनवरी, १९९८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३५९. गलज्जलिका (श्री शान्तप्रकाशः सत्यदासः) २०/१, २६ जनवरी, १९९८

३६०. षड्विंश-जानुवारी (डॉ० गोकुलेन्द्र नारायण देवः) २०/१, २६ जनवरी, १९९८

३६१. शुभाशया (डॉ० गोकुलेन्द्र नारायण देवः) २०/१, २६ जनवरी, १९९८

३६२. कम्पते मे हृत् (डॉ० गोकुलेन्द्र नारायण देवः) २०/१, २६ जनवरी, १९९८

३६३. प्रकाशैकविंशतिः अत्र सकलितानां रचनानामेकविंशतिरियमस्ति– १. गन्तव्यम्, २. हायकू, ३. तान्किकी, ४. स्मृतिः, ५. इष्टिका, ६. सर्वकारः, ७. मृत्युश्च मानवमूर्द्धा, ८. सिव्हिलनागरिकाणां दर्पोक्तिः, ९. अन्तरिक्ष-सुनीतम्, १०. स्वीकारोऽस्तु, ११. गाहि रे कोलम्बस!, १२. पथप्रदर्शकः, १३. मानवोऽपि पथप्रदर्शकः, १४. मानवो विजयवान्, १५. इष्टिकायां तवैवास्याम्, १६. आशीर्वचांसि, १७. तिष्ठन्ति च नापेक्षन्ते, १८. न, १९. विरहिणी, २०. सुमनांसि, २१. पुण्यवर हे! (डॉ० प्रकाश पाण्डे) २०/१, २६ जनवरी, १९९८

३६४. लोकतन्त्रेऽस्मिन् (डॉ० रमाकान्त शुक्लः) २०/१, २६ जनवरी, १९९८

३६५. भवतां पत्रम् (पद्यमयम्) (आचार्यबाबूराम अवस्थी, डॉ० रामकिशोर मिश्रः) २०/१, २६ जनवरी, १९९८

३६६. पुरुषोत्तम-षोडशी (विल्लूर श्रीनिवासराघवाचार्यः) २०/२-४, १५ अक्टूबर, १९९८

३६७. श्रीजगन्नाथसुप्रभातम् (२९ पद्यात्मकं) (श्री०सुन्दरराजः) २०/२-४, १५ अक्टूबर, १९९८

३६८. श्रीजगन्नाथस्तोत्रम् (११पद्यात्मकं) (श्री०सुन्दरराजः) २०/२-४, १५ अक्टूबर, १९९८

३६९. श्रीजगन्नाथशरणागतिस्तोत्रम् (१०८ पद्यात्मकं) (श्री० सुन्दरराजः) २०/२-४, १५ अक्टूबर, १९९८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३७०. श्रीजगन्नाथमङ्गलाशासनम् (१४ पद्यात्मकं)(श्री० सुन्दरराजः) २०/२-४, १५ अक्टूबर, १९९८

३७१. श्रीजगन्नाथपञ्चकम् (६ पद्यात्मकं) (श्री० सुन्दरराजः) २०/२-४, १५ अक्टूबर, १९९८

३७२. देवस्नानपञ्चदशी (१७ पद्यात्मकं) (श्री० सुन्दरराजः) २०/२-४, १५ अक्टूबर, १९९८

३७३. वस्त्रसमर्पणस्तोत्रम् (८ पद्यात्मकं) (श्री० सुन्दरराजः) २०/२-४, १५ अक्टूबर, १९९८

३७४. श्रीजगन्नाथनामाक्षरस्तोत्रम् (४ पद्यात्मकं) (श्री० सुन्दरराजः) २०/२-४, १५ अक्टूबर, १९९८

३७५. हेरापञ्चमी (७ पद्यात्मिका) (श्री० सुन्दरराजः) २०/२-४, १५ अक्टूबर, १९९८

३७६. कलहस्तवः (१८ पद्यात्मकं) (श्री० सुन्दरराजः) २०/२-४, १५ अक्टूबर, १९९८

३७७. श्रीजगन्नाथविषयकानि संकीर्णपद्यानि (श्री० सुन्दरराजः) २०/२-४, १५ अक्टूबर, १९९८

३७८. प्रणम्याः कारगिलवीराः (डॉ० रमाकान्त शुक्लः) २१/३, ३१ जुलाई, १९९९

३७९. कारगिलसंङ्ग्रामः (प्रा० हरिश्चन्द्र रेणापुरकरः २१/३, ३१ जुलाई, १९९९

३८०. पाकशासनशतकम् (कारगिलविजयम्) ('अभिराज' डॉ० राजेन्द्रमिश्रः) २१/३, ३१ जुलाई, १९९९

३८१. भारतस्य विजयोऽयम् (डॉ० रमाकान्त शुक्लः) २१/३, ३१ जुलाई, १९९९

३८२. विश्ववन्द्यं मनोज्ञं सदा भारतम् (श्रीकान्त 'कुशलः) २१/३, ३१ जुलाई, १९९९

३८३. कुत्र गच्छति देशोऽयम्? (डॉ० रामकृष्ण सराफः) २१/३, ३१ जुलाई, १९९९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

३८४. अन्यापदेशपञ्चकम्-१ (श्री॰सुन्दरराजः) २१/३, १५ जुलाई, १९९९
३८५. अन्यापदेशपञ्चकम्-२ (श्री॰सुन्दरराजः) २१/३, १५ जुलाई, १९९९
३८६. सद्गुणषट्कम् (श्री॰सुन्दरराजः) २१/३, ३१ जुलाई, १९९९
३८७. प्रभो ! कामये त्वाम् (पं० चन्द्रभानु त्रिपाठी) २१/३, ३१ जुलाई, १९९९
३८८. शुभाशंसनम् (प्रा० डॉ० मु०ला० वाडेकरः) २१/३, ३१ जुलाई, १९९९
३८९. दृश्यते काऽपि लोके विचित्रा प्रथा (डॉ० मनुलता शर्मा) २१/३, ३१ जुलाई, १९९९
३९०. विधिरमणि ! (डॉ० भास्कराचार्य त्रिपाठी) २१/३, ३१ जुलाई, १९९९
३९१. स्तवमधु ('अभिराज' डॉ० राजेन्द्र मिश्रः) २१/३, ३१ जुलाई, १९९९
३९२. शिवस्तवः ('अभिराज' डॉ० राजेन्द्र मिश्रः) २१/३, ३१ जुलाई, १९९९
३९३. शारदा-नुतिः (पं० प्रेमदत्त शास्त्री) २१/४, १५ अक्टूबर, १९९९
३९४. भारतमाता विजयतेतराम् (डॉ० वासुदेव वि० पाठकः 'वागर्थः') २१/४, १५ अक्टूबर, १९९९
३९५. योऽयं कृतः शपथस्त्वया (डॉ० रमाकान्त शुक्लः) २१/४, १५ अक्टूबर, १९९९
३९६. भारतीयशासनं विजयताम् ('अभिराज' डॉ० राजेन्द्र मिश्रः) २१/४, १५ अक्टूबर, १९९९
३९७. सम्भ्रान्ताः किममी जनाः (श्री प्रभात कुमार शर्मा) २१/४, १५ अक्टूबर, १९९९
३९८. द्विपदिका (डॉ० रश्मिकान्त व्यासः) २१/४, १५ अक्टूबर, १९९९
३९९. गीतम् (रामविनय सिंहः) २१/४, १५ अक्टूबर, १९९९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

देववाणी-परिषद्वार्ता

(१) देववाणी-परिषदश्चतुर्विंशः सङ्कल्पनादिवसः २१.८.१९९९ तारिकायां 'राजधानी कालेज, नयी दिल्ली ११००१५' इत्यत्र सम्मानितोऽभूत्। समारोहस्य प्रारम्भः श्री मोतीनाथसंस्कृतविद्यालयच्छात्राणां वेदपाठेनाभूत्। तदनु सुश्री डा० सविता पाण्डेय- महाभागा 'वाणीं वयं वन्दामहे' इत्येतां गीतिमगायत्। परिषन्महासचिवः डा० रमाकान्त शुक्लः स्वागतभाषणमकरोत्। मुख्यातिथिभिः भारतस्य सर्वोच्चन्यायालयस्य प्राक्तनप्रमुखन्यायाधीशैः श्रीरंगनाथमिश्रैः 'अर्वाचीनसंस्कृतस्य' एकविंशवर्षीयस्तृतीयोऽङ्कः 'कारगिल- विशेषाङ्कः' लोकायार्पितः। श्रीमिश्रमाहाभागैः लोकार्पिताङ्कस्य हस्ताक्षरित-प्रतिरूपाणि देववाणी-परिषद्वार्ता- संस्कृत-जगद्वार्ता- स्तम्भलेखकेभ्यः श्री आनन्दवर्धन शुक्ल- श्रीमती सरोजव्यास - श्रीमती रमाशुक्लाभ्यः, चार्टर्डएकाउण्टेण्टाय श्रीदिनेशचन्द्रचतुर्वेदिने अन्येभ्यश्च विद्वद्भ्यः प्रदत्तानि। तैः अर्वाचीनसंस्कृतस्याक्षरयोजकः पं० चन्द्रभानु शर्मा प्रावारकार्पणेन सम्मानितः। तैः सरलसंस्कृतस्य प्रयोगार्थं विद्वांसः प्रचारकाश्चाहूताः।

लोकार्पिताङ्कात् 'कारगिलवीराः' इतीयं रचना सम्पादकेन डा० रमाकान्तशुक्लेन पठिता।

अस्मिन्नवसरे संस्कृतवर्षस्य विशिष्टायोजनत्वेन 'विंशशताब्दीयसंस्कृत-काव्याविकलपाठप्रतियोगिता' प्यायोज्यत यस्यां दिल्लीकैण्टस्थकेन्द्रीयविद्यालयस्य चतुर्दशवर्षदेशीया कु० सौम्या सिंह-नाम्नी छात्रा १९१२ तमे खैष्टेऽब्दे महोपाध्याय पं० लोकनाथमिश्रेण प्रणीतं प्रकाशितं च १३३ पद्यात्मकं 'श्रीसुदामचरितं' नाम काव्यमविकलतया कण्ठस्थरूपेण सस्वरं श्रावयित्वा २५००' रूप्यकात्मकं प्रथमं पुरस्कारं जितवती। पूसारोडस्थरामजसस्कूलच्छात्रः श्री आर० मदनमोहनः ५०० रूप्यकात्मकं सम्भावनापुरस्कारं लब्धवान्। प्रतियोगितायाः निर्णायकत्वं डा० रामसुरेशपाण्डेय-प्रो० रमेशकुमारपाण्डेय-डा० मिथिलेशचतुर्वेद- महाभागैर्निर्व्यूढम्।

समारोहस्याध्यक्ष्यं वाराणसी-दरभंगास्थ-संस्कृतविश्वविद्यालययोः पूर्वकुलपतिभिः किञ्च 'इण्टरनेशनल एसोसियेशन ऑफ संस्कृत स्टडीज्' इत्येतस्याः संस्थाया सम्माननीयाध्यक्षैः डॉ० रामकरणशर्मभिः कृतम्। तैः संस्कृतस्य सारल्येन साकं स्वारस्यस्य रक्षाया अप्यावश्यकता रेखांकिता। परिषदुपाध्यक्षया श्रीमत्या रमाशुक्लया धन्यवादज्ञापनं कृतम्। (चित्रे आवरणपृष्ठे द्रष्टव्ये)

(२) परिषदस्तत्त्वावधाने १४-८-१९९९ तारिकायां वाणी विहारे डॉ० जनार्दनप्रसादपाण्डेय 'मणि'-महाभागस्य अभिनवरचनानां पाठोऽभूत्।

(आनन्दवर्धनः)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

संस्कृत-जगद्वार्ता

(१) दिल्ली संस्कृत अकादमी १४-८-१९९९ तारिकाया 'स्वतन्त्रतादिवस'मुपलक्ष्य संस्कृत-कविसम्मेलनमायोजितवती यत्र डा० ओंकार सिंह त्यागी, डॉ० वागीश दिनकरः, डॉ० जनार्दनप्रसादपाण्डेयो मणिः', डॉ० प्रशस्यमित्र शास्त्री, डॉ० शैलेश भट्टः, डॉ० कृष्णलालः, डॉ० रमाकान्त शुक्लः, श्रीबत्रा, डॉ० नोदनाथ मिश्रः अन्ये च कवयः काव्यपाठं चक्रुः। अनेकाः कविताः 'कारगिलवीरान्' उद्दिश्य पठिता आसन् । सम्मेलनस्य संचालनं अकादमीसचिवः कविरत्नश्रीकृष्णसेमवालोऽकरोत् । मुख्यातिथिः श्रीकुलानन्द भारतीय आसीत्।

(२) गुलाबर्गानगरे 'नू०वि० संस्थायाः श्रीवेङ्कटराव नायक-सभागृहे' १.८.१९९९ तारिकायां संस्कृताध्ययनमण्डलस्य संस्कृतवर्षसमाचरणसमितेस्तत्त्वावधाने सुप्रसिद्ध संस्कृतकविवर्याणां प्राचार्यचराणां श्रीहरिश्चन्द्ररेणापुरकर- महाभागानाम् अमृतमहोत्सवसत्कारसमारम्भः सम्मानितोऽभूत् यत्र विदुषां भाषणानि अन्ये च कार्यक्रमा अनुष्ठिता जाताः।

(३) महाराष्ट्रशासनेन 'अष्टाविंशः संस्कृतदिवससमारोहः' "भारतरत्न डॉ० बाबासाहेब आंबेडकर-सभागृहम्, सिडनहॅम वाणिज्य महाविद्यालयः, बी मार्गः, चर्चगेट, मुम्बई-४०००२०" इत्यत्र २६.८.१९९९ तारिकायां समायोजितः। अस्मिन्नवसरे संस्कृतविषये दर्शितप्रतिभाप्रकर्षाणां छात्राणामभिनन्दनं, पं० वासुदेवशास्त्री द्विवेदी, डॉ० सी० ग० देसाई, डॉ० लीना रस्तोगी, डॉ० दा०वि० गर्गे, पं० वि० गो० देसाई, पं० श्री० धुं० कवीश्वरः-इत्येतेषां विदुषां सत्कारः अन्ये च कार्यक्रमाः अनुष्ठिता जाताः। महाराष्ट्रशासनस्य उच्चतर तन्त्र शिक्षण-प्रधानसचिवः श्री० माणिक राजाराम नाटीलः अध्यक्षता- मकरोत्।

(४) आकाशवाणी दिल्ली ५.९.१९९९ तारिकायां प्रातः ७.३० वादने 'साहित्यिकी' कार्यक्रमे डॉ० रमाकान्त शुक्लस्य 'कारगिलवीराः' इतिरचनायाः पाठं प्रसारितवती।

(५) 'हिंगोली' इत्यत्र १०.८.१९९९ तारिकायां श्री० धुं० कवीश्वरस्य संयोजकत्वे महाराष्ट्रस्थानां संप्राप्तराष्ट्रपतिपुरस्काराणां राष्ट्रिय-संस्कृत-पण्डितानां (सौ० सहधर्मिणीसहितानां) संस्कृतविद्यापूजनात्मकः सत्कारः किञ्च पं० वसन्त अनन्त गाडगिलस्य संयोजकत्वे अ०भा० संस्कृत-पत्रकार-सम्मेलनम् आयोज्याताम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(६) पं० कन्हैयालाल दयावन्ती पुंज चेरिटेबिल सोसायटी १.८.१९९९ तारिकायां 'विट्ठलभाई पटेल हाउस, स्पीकर हाल, नई दिल्ली-११०००१' इत्यत्र 'महोपाध्याय पं० लोकनाथ मिश्र प्रणीत 'सुदामचरित' श्लोकोच्चारण प्रतियोगिताम्' आयोजितवती यस्याः सञ्चालनं डॉ० रवीन्द्रनागरेण कृतम्'। २० प्रतियोगिभिस्तत्र, पुस्तकं वीक्ष्य श्लोकाः सस्वरं पठिताः। सांसदेन डॉ० लोकेशचन्द्रेणाध्यक्ष्यं कृतम्। सर्व० डॉ० चाँदकिरणसलूजा-रमाजैन-रमाकान्तशुक्लैः निर्णायकत्वं कृतम्। रामजसस्कूलच्छात्रः आर० मदनमोहनः प्रथमं पुरस्कारमवाप।

(७) शिमलानगरे हिमाचलप्रदेशविश्वविद्यालयस्य एकेडेमिकस्टाफ- कालेजे २७.९.१९९९ तः १६.१०.१९९९ यावत् पुनश्चर्याकार्यक्रमस्यायोजनमभूत् यत्र १५. १०.१९९९ यावत् डॉ० बलदेवसिंह-डॉ० अनिरुद्ध जोशी-'अभिराज' डॉ० राजेन्द्र मिश्र-डॉ० रमाकान्त शुक्लप्रभृतीनां विदुषां विविधविषयेषु भाषणानि जातानि। डॉ० शुक्लेन १४.१०.१९९९ तारिकायामाधुनिकसंस्कृतसाहित्यस्यं राष्ट्रियकाव्यधारा' मवलम्ब्याभिभाषितम्। तस्मिन्नेव दिने कविसम्मेलनमप्यायोज्यत यत्र 'अभिराज' डॉ० राजेन्द्रमिश्रोऽध्यक्षत्वेन रमाकान्त शुक्लो मुख्यातिथित्वेन, डॉ० (श्रीमती) उषा अवस्थी सञ्चालकत्वेन, डॉ० (श्रीमती) विद्या शारदा च संयोजकत्वेनोपातिष्ठन्। डॉ० राजेन्द्र कुमार त्रिपाठी 'रसराज'-डॉ० सुदेश गौतम-डॉ० गायत्री देव-डॉ० के०सी० योगी-प्रभातकुमारशर्मप्रभृतिभिः प्रतिभागिभिः स्वरचनाः प्रस्तुताः। 'अभिराज' डॉ० राजेन्द्रमिश्रेण 'मदयति न हि कं सुमधुररचना' 'रुचिरपदा विलसति गौरी शिवसदने' 'न मृता म्रियते न मरिष्यति वा'-इत्येतद्रचनात्रयं रमाकान्तशुक्लेन च 'भाति मे भारतं' श्रावितम्। कार्यक्रमस्य निदेशकः प्रो० डॉ० योगिन्दर वर्मा पुनश्चर्यायाः साफल्यार्थं वर्धापनीयोऽस्ति। १६.१०.९९ तारिकायामस्य कार्यक्रमस्य समापनं भवति।

(८) नवदिल्ल्यां १५.१०.१९९९ तारिकायां ३.०० वादनवेलायां राष्ट्रियसंस्कृतसंस्थानेन स्वकीयः २९तमः स्थापनादिवससमारोहः सम्मानितः। मुख्यातिथित्वं डॉ० के०पी०ए० मेननमहाभागेनाध्यक्ष्यञ्च डॉ० सरोजिनी-महिषीमहाभागया कृतम्। डॉ० रामकरणशर्ममहाभागेन हिन्दी-दिवसमुपलक्ष्य आयोजितानां विविधप्रतियोगितानां विजेतृभ्यः श्रीअजयमिश्र-सतीशशर्म-प्रभृतिभ्यः पुरस्काराः प्रदत्ताः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(९) २४.१०.१९९९ तारिकायां शरत्पूर्णिमायामपराह्णे २.०० वादने 'दीवान हॉल, चाँदनी चौक, दिल्ली'-इत्यत्र अ०भा० संस्कृतमहासम्मेलनेन संस्कृत-वर्ष-समारोहः आयोज्यते-इति विज्ञापयति संयोजकः 'संस्कृतामृत'-सम्पादकः श्री रामरत्नः शास्त्री।

(१०) भारतस्य महामहिमराष्ट्रपतिना इमे संस्कृत-पालि विद्वांसः अस्मिन् वर्षे पुरस्कृताः- १. प्रो० अभिराजराजेन्द्रमिश्रः, २. डॉ० शिवदत्तचतुर्वेदी, ३. श्री गुल्लपल्ली आञ्जनेयगणपतिः, ४. श्री हरिसाम्बशिव शास्त्री, ५. डॉ० मुरलीधर मिश्रः, ६. पं० महादेवशास्त्री, ७. डॉ० सुरेन्दनारायण त्रिपाठी, ८. श्रीनीलकण्ठमहाशंकर शुक्लः, ९. श्री राजा एस्० गुरुराजाचार्यः, १०. प्रो० पी० सी० देवसिया, ११. धर्माधिकारी त्रिविक्रमनारायणः, १२. पं० शिवनाथ मिश्रः, १३. श्री ई० जे० कुमारस्वामी दीक्षितारः, १४. डॉ० हेमचन्द्र जोशी, १५. डॉ० ध्यानेशनारायण चक्रवर्ती, १६. प्रो० एन्० एच्० समतानी (पाली)।

(अभिनवःशुक्लः)

गीतम्

रामविनय सिंह,
बी ३०/२३५, नगवा पाठशाला,
नगवा, वाराणसी-२२१००

नलिनवन्नीलनयने ते सखे ! खे नाद्य राजेते !
न सैषा भावनाऽशेषा, परं हृदि कामना शेषा,
कथङ्कारो निराकारो विकारो मानसे शेते ?
त्वदीया वैमुखी दृष्टिः मदीया चाक्षुषी वृष्टिः
उभे साम्प्रतमसाम्प्रतमनुदिनं गुणितेन बाधेते !
त्वया लुब्धेन किन्नीतम्? मया क्षुब्धेन किम्पीतम् ?
मधौ मधुपावनीतौ विरहविरसौ विषं सेवेते !
विषमविषयेन व्याधूतो भृशं साकूतमाहूतो
नये विनये पुनः प्रणयेऽपि कः कौतस्कुतीं सूते !

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

अभिराजराजेन्द्राय राष्ट्रपतिपुरस्कारः

अभिनवसंस्कृतसाहित्यसर्जनायां धुरिस्थिताय प्रथितयशसे ऽभिराजराजेन्द्राय त्रिवेणीकवये ऐषमस्तनो राष्ट्रप्रतिपुरस्कारः साहितीपक्षधरैर्विद्वद्भिर्वितीर्ण इति विज्ञाय निखिलेऽपि राष्ट्रे नव्याः रचनाकाराः परमानन्दसन्दोहमनुभवन्ति। राष्ट्रपतिसम्मानः केवलं वरिष्ठेभ्यो ज्ञानवृद्धेभ्य एव दीयत इति यत्कौलीनमद्यावधि साहित्यकृत्संसदि परिव्याप्तमासीत्तस्य प्रशमनं जातं राजेन्द्रमिश्रस्य सम्माननया।

स्वोपज्ञरचनाभिरर्वाचीनसंस्कृतस्य महाकाव्य-खण्डकाव्य-नवगीत-नाटक-नाटिकैकाङ्कि-चम्पू-कथादिशाखाः सम्यक्तया पोपुष्यमाणः सुरभारतीजीवितः कविरयं निजैकान्तसाधनया विनयवृत्त्या नित्यवृद्धोपसेवनया च मध्येकोविदसमवायं समाद्रियते। आत्मानं नव्यरचनाकाराणां प्रतिनिधिं मन्यमानः, सम्मानमिमं प्रवयसां विदुषां वात्सल्यप्रतीकभूतं च स्वीकुर्वाणोऽभिराजराजेन्द्रोऽनेन पुरस्कारेण समग्रमेव अर्वाचीनसंस्कृतसाहित्यसर्जनं पुरस्कृतं मन्यते, किञ्च गुणग्राहिणामभिनवसाहित्य-समादरिणां निर्णायकविदुषां गुणपक्षपातं प्रति हार्दिकीं कृतज्ञां प्रकाशयते।

ज्ञातव्यमिदं यदिदानीं यावत्संस्कृतहिन्दीभोजपुरीअंग्रेजीप्रभृतिभाषासु एकाशीतिमिता रचनाः प्रकाश्य कविरयं लीलाभोजराजमित्युपाह्वं सप्ताङ्कं नाटकं पूर्णतां नयति । १९९९ मिते संस्कृतवर्षे तद्विरचिताः मधुपर्णी- (नवगीतानि) अरण्यानी- (छन्दोबद्धरचनाः) संस्कृतशतक-(खण्डकाव्यम्) अभिराज-सहस्रकाभिधाः (शतकदशकम्) कृत्यः प्राकाश्यमुपन्त । सचित्रञ्च शिशुकाव्यं कौमाराख्यं मुद्रणाधीनं वर्तते । सर्वा अपि रचना इमा राष्ट्रियसंस्कृत- संस्थानस्य दिल्लीसंस्कृताकादम्याश्च अर्थसाहाय्येन प्रकाश्यन्ते।

-वैजयन्तप्रकाशनम्, अभिराजसाहित्यप्रकाशकम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

भवतां पत्रम्

(१)

'अभिराज' प्रो॰ राजेन्द्र मिश्रः
एम.ए., डी.फिल., डी.लिट्. (आ.)
संस्कृत-विभागः
हिमाचल प्रदेश विश्वविद्यलयः, शिमला-५
भाषासंकायाध्यक्षः (प्राक्तनः)

११४ टीचर्स होस्टल
समर हिल, शिमला-५
फोन : ०१७७-२३१४०७
दिल्ली ७.९.१९९९

देववाणीसुवासाढ्यं शिवढक्काऽरवोर्जितम् ।
रमाकान्तमहं वन्दे ब्राह्मानन्दं सदग्रजम् ॥

अर्वाचीनसंस्कृतस्य प्रत्यग्रमङ्कमवाप्य परिशील्य च तमाद्यन्तं कानने सञ्चरन्निवोदुम्बरफलास्वादनसुखमनुभवामि। इतः प्राग्वर्तिनोऽप्यङ्काः केचन समवाप्ताः। अङ्कगर्भितानि विविधपत्राचारवृत्तान्यपि तटस्थधियाऽधीत्य मनो मे कुतुकमुपगतम्। कुत इति चेत्? पाठकानां समुन्नतकन्धरत्वमवलोक्य। तेषां पिपठिषाञ्चानुभूय। अनेन देववाणीपत्रपत्रिकाप्रकाशनस्य सार्थक्यं स्फुटीभवति। भवतामपि निष्पक्षवाचिकं मनोहरिणवागुरीभूतम्। यो यथा निगदति तं तथैव प्रस्तूय किञ्चात्मानमपि मध्यस्थीभूतं यथायथमभिव्यज्य भवताऽपि सम्पादकीयं दायित्वं साधु निर्व्यूढम्।

परन्तु प्रत्यग्राङ्के पत्रिकाया विद्वद्धौरेयैराचार्यरेवाप्रसादद्विवेदिभिः भाषाया अशुद्धयो यथा खिन्नमनस्कतयाऽधिक्षिप्तास्तत्सर्वं निश्चप्रचमपत्रपाकरं संस्कृत-लेखकानां कृते। कथं नात्मलिखितं सकृत्पुनरीक्ष्यते समीक्षकबुद्ध्या? अहं तावद् विश्वसिमि यदिदम्प्रथमतया लिखिताः कादाचित्कत्रुटिसंवलिता अपि लेखा यदि पश्चात् समीक्षाधिया पठ्येरन् तर्हि त्रुटिमार्जनं सर्वथा सम्भवम्। प्रथमप्रवाहे ताः सम्भवन्त्येवाऽनवधानवशात्। परन्तु द्वितीयावृत्तौ तासां त्रुटीनां ग्रहणमपि सुकरम्।

भवतु ! मन्ये पराम्बाऽनुग्रहात् कुशलिनो भवन्तोऽस्मन्निसर्गमधुराम्महीयसीं भ्रातृजायां विनोदयन्तः। गतेष्वपि (मातृभिश्चिन्त्यमानेषु?) तेषु दिवसेषु बहुसदस्ये कुटुम्बे, भवतामप्रतिहतं नायकत्वं नूनं तस्याः कृते नित्यमङ्गलकरं भविष्यत्येवेत्याशंसतेऽभिराजीसूनुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

सत्स्वपि भाससौमिल्लकविपुत्रकल्पेषु महामहिमशालिषु नवीनेऽस्मिन् कालिदासेऽपि वर्षेऽस्मिन् राष्ट्रपतिसम्मानदातॄणां दुग्धकुल्या दृष्टिर्निपतितेतिकृत्वा भवन्तं, भवन्माध्यमेन च समग्रमपि संस्कृतसाहितीजगन्मण्डलं प्रणमामि । वस्तुतः प्रतीकभूतोऽहं संस्कृतसेविनामभिनवपीठिकायाः । अत एव मम सम्मानो न केवलं ममापितु समेषां मम समवयस्कानाम् । इयम्मे विनतसद्भावना ऽर्वाचीनसंस्कृतद्वारा निखिलेऽपि राष्ट्रे वितीर्णा स्यादिति कामये।

भवदाज्ञयैव कार्गिलविजयाख्यं शतकम्मया त्वरया प्रणीतम्। तच्च प्रकाश्य लघ्वक्षरसंवलितकाव्यद्वयसहितं सत्यमेवोपकृतोऽयमनुजो भवद्भिः । तज्जन्योत्साहकरम्बितो भूयोऽपि सद्यःप्रणीतं **गुर्जरशतकम्** अन्यानि च लघ्वक्षरकाव्यानि प्रेष्यन्ते। कृपया यथावसरं यथारुचि च प्रकाश्य सम्भावयन्तु काव्यानीमानि। **स्तवमधुनाम्ना** काव्यसंग्रहोऽयं लघ्वक्षरीयः सप्तस्तवात्मकः शीघ्रमेव आंग्लहिन्दीभाषान्तरालङ्कृतः सन् प्रकाशयितुमिष्यते।

अस्मद्विश्वविद्यालये 'पुनश्चर्याकार्यक्रमः' प्रवर्तिष्यते २९.९.९९ तः १५.१०.९९ तमं यावत्। तत्र भवन्तमानेतुं महतीच्छा वरीवर्ति मे । अस्मिन् सन्दर्भे मम सहाध्यापिका डॉ० विद्या शारदा भवन्तं सम्पर्कयिष्यति। पत्राचार-सङ्केतस्तु मया तस्यै प्रदत्त एव । संस्कृतकाव्यरसमाधुरीनिषेवणमेव वस्तुतः भवदागमनप्रयोजनम् । परन्तु व्याख्यानमपि किञ्चिद् भविता व्याजभूतम् ।

मैनपुरीसंगोष्ठ्याः पत्रमवाप्तं स्यात्। परन्तु सद्य एव हृदयभञ्जकं वृत्तमवाप्तं यत् मम शिष्या डॉ० किरनसिंह सेंगर-नाम्नी वैधव्यमुपगता । तस्या एव महाविद्यालये उपक्रमोऽयमायोजित आसीत्। सम्प्रति तिथिपरिवर्तनं भविष्यति वा नवेत्यपि न ज्ञायते।

अन्यत्सर्वं मङ्गलमयम्। चि० क्षेमेन्द्रस्सम्प्रति विविधकेलिकौतुकप्रकल्पन-क्षमस्सन् जीवनसार्थकतामनुभावयति। सौ० राजेशकुमार्यपि महता कृच्छ्रेण समवाप्तं स्वप्राङ्गणकल्पतरुं (मां) प्रीत्या निष्ठया च निषेवते। सुखिनो वयम्। सतताऽऽराधनेन मल्लिकाक्षवाहिन्या दिनानि नीयन्ते।

सौ० राजेशकुमारी भवन्तं भ्रातृजायाञ्च शाट्यञ्चलं प्रसार्य प्रणमति। किमधिकम् ?

सप्रणाममम्! भवत्कनीयान्

मिश्रोऽभिराज राजेन्द्रः

Kirtikant Sharma Collection, Najafgarh

In Public Domain. Digitization by eGangotri

(२)

"मातस्ते कृपा"

चुनारम्

दिनांक ७-९-१९९९, रात्रिः ११-३५

पारमिकाः पारंपरीणाः कुशलकवयः शुक्लवर्याः !

सादरं प्रणमामि ।

विचारसम्प्रेषणं प्रक्रियात्मकं भवति यत् वैज्ञानिकाः अपि प्रयोज्य सिद्धितवन्तः सन्ति । इदानीमनायासमेव भवत्स्मरणं मस्तिष्के परिभ्रमणं करोतिस्मैवं तस्यैव परिणामः यत् मत्पत्रप्रेषणात्पूर्वमेव भवत्प्राचीनपरम्परायाः मान्यतायाश्च पालिका 'अर्वाचीनसंस्कृतम्" पत्रिका प्राप्ता सञ्जाता।

मया चिन्तितं 'भाति मे भारतम्" रचनायाः बहुप्रशंसा जाता, अधुना क्रमस्यास्य पटाक्षेपः भवितव्यः किन्तु भवच्चमत्कृतमुखाकृतिमाध्यमेन प्रस्तुतेः विधा, काव्यस्य शैली, शब्दानाम् आलङ्कारिकाकरः, स्रग्विण्याः नर्तनं, एतेषां समेषां सम्मेलनानि सम्मर्दयन्ति इमाः मानसिकताः । इयमतिशयोक्तिः नापितु यथार्थत्वावच्छिन्नं वर्तते । चाटुकारिता नापितु वास्तविकी पत्रकारिताऽस्ति । विगतैकदशकतः भवदाशीर्वादः प्राप्नुवन्नस्मि । अग्रेऽपि भविष्यति एतादृशः विश्वासः ।

भवदीयः काव्यप्रकाशः सदैवाज्ञानान्धकारं हन्यमानः भविष्यतीति प्रतीतिः । यदि कवितायाः चयनं भविष्यति तर्हि दिल्लीसंस्कृतअकादमीपक्षतः आगामिन्यामायोजितायामखिलभारतीयनवोदितसंस्कृतकविप्रतियोगितायां प्रतियोगित्वेनागमिष्यामि यत्र कविशिरोमणिश्रीकृष्णसेमवालमहाभागानाम् आयोजकत्वेन भवताञ्च निर्णायकत्वेन दर्शनं भविष्यति ।

"कतकरजन्यायेन" मम विकाराननवरतं दूरीकरिष्यन्तीत्याशा । "वृद्धकुमारीवाक्यन्यायेन" एकदा सर्वस्वं भवद्भ्यः प्राप्स्यामीति कल्पना । त्रुटिस्तु स्वाभाविकी एवातः "अप्रगल्भा पदन्यासे जननीरागहेतव" इति न्यायेन आनन्दमनुभूयद्भिस्तत्रभवद्भिरवश्यमेव क्षन्तव्याः । अन्ते "लोहचुम्बकन्यायेन" चरणचुम्बनं कृत्वा विरमामि नमामि च ।

भवदीयः आत्मकीयः

श्रीकान्तमिश्रः "कुशलः"

चरणाद्रिस्थः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

(३)

॥श्री:॥

S. SUNDARARAJAN, I.A.S. (R)
21, VIP Colony,
Ekamra Vihar, Nayapalli, Bhubaneswar-751015

Dt. 10-9-1999

अर्वाचीनसंस्कृतस्य (कारगिल-विशेषांकस्य) प्रतिः पोष्टद्वारा प्रेषिता प्राप्ता। कविता लेखाश्च त्रुटिं विना मुद्रिताः अर्थयुक्ताः श्रियं पुष्णन्ति। एकस्मिन् पूर्वाङ्के (मन्ये एकविंशवर्षस्य प्रथमाङ्के)मम कविता 'जय त्रिवर्ण ध्वज भारतस्य' मुद्रिताऽऽसीत्। तत्र 'उड्डयमान' इति भ्वादिगणडीधातोः आत्मनेपदिनः शानच् प्रत्ययेण यः प्रयोगो मया कृतः स उज्जयमान इति मुद्रितमासीत्। मुद्रणदोषो वा भवद्भिः शोधनं कृतं वा? उड्डयमान इति प्रयोगः साधुरेव। अतः आगामिनि अङ्के त्रुटेः अपाकरणं सूचयितव्यम्। जयमान शब्दस्य अर्थ उदार एव परन्तु डयमान एव उचितः।

इति भवदीयः

सुन्दरराजः

(पाठकाः 'उड्डयमान' इत्यैवं संशोध्य पठनाय प्रार्थयन्ते-सम्पादकः)

(४)

'अर्वाचीनसंस्कृतम्' (कारगिल-विशेषाङ्कः) प्राप्तम्। बहूपयोगि-नूतनकाव्यसंग्रहः प्रकाशितोऽस्ति। धन्यवादः !

-डॉ० सरिता पाण्डेय द्वारा/श्री गिरीश चन्द्र पाण्डेय (एडवोकेट)

९५, चैतन्य मार्ग, मीरापुर, इलाहाबाद-२११००३

(५)

कालिदाससमारोहे गतवर्षे भवानपि ।
नागतश्चिन्तयैवाहं बारं बारं स्मराम्यहम् ॥१॥
भवत्संपादितं पत्र-मप्यर्वाचीनसंस्कृतम् ।
प्राप्तं मयाऽतिकलान्न वृत्तं कुशलतायुतम् ॥२॥
अस्मिन्वर्षे सुरोत्थानै-कादश्यामागमिष्यति ।
शुभदर्शनकांक्षायां पत्रस्यैतस्य लेखनम् ॥३॥
प्रेषयन्तु कृपापत्रं, भवत्सुविधिसंयुतम् ।
येन प्रेरणया युक्तो भवामि ज्ञानकांक्षितः ॥५॥

दि० ३-९-१९९९

-आचार्य मूँगारामत्रिपाठी, भोपाल

Kirtikant Sharma Collection, Najafgarh

...Digitization by eGangotri

आवश्यकी सूचना

पण्डितराज-श्लोकपाठप्रतियोगिता

देववाणी-परिषदा प्रतिवर्षं आश्विन शुक्ल पूर्णिमायां 'पण्डितराज-महोत्सवः' सम्मान्यते! आगामिनि २४.१०.१९९९ तमे दिनाङ्के प्रातः १०.०० वादने द्वादशतमः 'पण्डितराज-महोत्सवः' आयोजयिष्यते। अस्मिन्नवसरे प्रतियोगिभिः पण्डितराजजगन्नाथरचनाभ्यः ...नां श्लोकानां कण्ठस्थतया सस्वरं शुद्धः पाठः करणीयो भवेत्।

प्रतियोगिनां त्रयो वर्गा भविष्यन्ति–

१. प्रथमो वर्गः-विश्वविद्यालयीयवर्गः (बी.ए.-शास्त्रि-एम.ए.-आचार्य-छात्राः), आयुस्सीमा : २५ वर्षाणि यावत्, श्लोक संख्या : ५०, प्रथमः पुरस्कारः १००० रूप्यकाणां मुखमूल्यस्य ग्रन्थाः, द्वितीयः पुरस्कारः ७५० रूप्यकाणां मुखमूल्यस्य ग्रन्थाः, तृतीयः पुरस्कारः ५०० रूप्यकाणां मुखमूल्यस्य ग्रन्थाः।

द्वितीयो वर्गः-माध्यमिकवर्गः–(नवम-द्वादश-पूर्वमध्यमा- उत्तरमध्यमा-छात्राः)। आयुसीमा १८ वर्षाणि यावत्। श्लोक संख्या- २० । प्रथमः पुरस्कार : ७५० रूप्यकाणां मुखमूल्यस्य ग्रन्थाः, द्वितीयः पुरस्कारः ५०० रूप्यकाणां मुखमूल्यस्य ग्रन्थाः, तृतीयः पुरस्कारः २५० रूप्यकाणां मुखमूल्यस्य ग्रन्थाः।

तृतीयो वर्गः–प्राथमिकवर्गः (प्रथमकक्षातः अष्टमकक्षापर्यन्तम्) आयुस्सीमा १४ वर्षाणि यावत्। श्लोक संख्या- १० । प्रथम पुरस्कारः ५०० रूप्यकाणां मुखमूल्यस्य ग्रन्थाः ध्वनिपट्टिका च, द्वितीयः पुरस्कारः ४०० रूप्यकाणां मुखमूल्यस्य ग्रन्थाः ध्वनिपट्टिका च, तृतीयः पुरस्कारः ३०० रूप्यकाणां मुखमूल्यस्य ग्रन्थाः ध्वनिपट्टिका च ।

प्रतियोगिनां नामानि पत्र द्वारा दूरभाषद्वारा वा अधोहस्ताक्षरिणः समीपे २३.१.१९९९ ताकियां अपराह्णे ४.०० वादनं यावदवश्यं प्रापणीयानि स्युः ।

(डॉ० रमाकान्त शुक्लः)
महासचिवः
देववाणी-परिषद्, दिल्ली

१५.१०.१९९९
आर-६, वाणी विहारः, नयी दिल्ली-११००५९
दूरभाषः ५६३९१४६

"देववाणी-परिषद्, दिल्ली"-कृते डा० रमाकान्तशुक्लेन "प्रवीण प्रिंटिंग सर्विस, उत्तम नगर, नई दिल्ली-११००५९ फोन : ५६४०३२४ " इति मुद्रणालये मुद्रापयित्वा "आर-६, वाणी विहारः, नई दिल्ली-११००५९" तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (२१/४) प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५-१०-१९९९

Rs. 30.00

अस्यांकस्य मूल्यम् रु० ३०-००

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Arvacheenasanskritam (Qly.) R. N. 34554..

↑ २१-८-१९९९ तारिकायां देववाणी-परिषदश्चतुर्विंशसङ्कल्पनादिवससमारोहे अर्वाचीनसंस्कृत-'कारगिल'-विशेषाङ्कस्य (२१/३) लोकार्पणं कुर्वन् मुख्यातिथि: न्यायमूर्ति: श्री रङ्गनाथ मिश्र: (मध्ये), समारोहाध्यक्ष: डॉ० रामकरणशर्मा (वामे) सम्पादक: डॉ रमाकान्त शुक्लश्च (दक्षिणे)

↑ विंशशताब्दीयसंस्कृतकाव्याविकलपाठप्रतियोगितायां प्रथमपुरस्कारं लभमाना कु० सौम्यासिंह (वामतो दक्षिणं) डॉ० रामकरण शर्म-श्री रङ्गनाथ मिश्र-डॉ० रमाकान्त शुक्लै: साकम्।

Kirtikant Sharma Collection, Najafgarh